# adhyAtmarAmAyaNe bAlakANDamh

# અધ્યાત્મરામાયણે બાલકાણ્ડમ્

## Document Information

Text title : adhyAtma rAmAyaNa

File name : adhyaatmaRamBal.itx

Category : adhyAtmarAmAyaNa, raama

Location : doc_raama

Author : Traditional

Transliterated by : Nagaraj Balijepalli <nagaraj at iastate.edu>

Proofread by : Nagaraj Balijepalli, Sunder Httangadi, PSA Easwaran, ahimsasoldier

Latest update : july 22, 2006, April 4, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

adhyAtmarAmAyaNe bAlakANDamh

# અધ્યાત્મરામાયણે બાલકાણ્ડમ્

॥ રામ હૃદયમ્ ॥

યઃ પૃથિવીભરવારણાય દિવિજૈઃ સમ્પ્રાર્થિતશ્ચિન્મયઃ
સઞ્જાતઃ પૃથિવીતલે રવિકુલે માયામનુષ્યોઽવ્યયઃ ।
નિશ્ચક્રં હતરાક્ષસઃ પુનરગાદ્ બ્રહ્મત્વમાદ્યં સ્થિરાં
કીર્તિં પાપહરાં વિધાય જગતાં તં જાનકીશં ભજે ॥ ૧॥

વિશ્વોદ્ભવસ્થિતિલયાદિષુ હેતુમેકં
માયાશ્રયં વિગતમાયમચિન્ત્યમૂર્તિમ્ ।
આનન્દસાન્દ્રમમલં નિજબોધરૂપં
સીતાપતિં વિદિતતત્ત્વમહં નમામિ ॥ ૨॥

પઠન્તિ યે નિત્યમનન્યચેતસઃ
શૃણ્વન્તિ ચાધ્યાત્મિકસઞ્જ્ઞિતં શુભમ્ ।
રામાયણં સર્વપુરાણસંમતં
નિર્ધૂતપાપા હરિમેવ યાન્તિ તે ॥ ૩॥

અધ્યાત્મરામાયણમેવ નિત્યં
પઠેદ્યદીચ્છેદ્ભવબન્ધમુક્તિમ્ ।
ગવાં સહસ્રાયુતકોટિદાનાત્
ફલં લભેદ્યઃ શૃણુયાત્સ નિત્યમ્ ॥ ૪॥

પુરારિગિરિસમ્ભૂતા શ્રીરામાર્ણવસઙ્ગતા ।
અધ્યાત્મરામગઙ્ગેયં પુનાતિ ભુવનત્રયમ્ ॥ ૫॥

કૈલાસાગ્રે કદાચિદ્રવિશતવિમલે મન્દિરે રત્નપીઠે
સંવિષ્ટં ધ્યાનનિષ્ઠં ત્રિનયનમભયં સેવિતં સિદ્ધસન્ઘૈઃ ।
દેવી વામાઙ્કસંસ્થા ગિરિવરતનયા પાર્વતી ભક્તિનમ્રા
પ્રાહેદં દેવમીશં સકલમલહરં વાક્યમાનન્દકન્દમ્ ॥ ૬॥

પાર્વત્યુવાચ

નમોઽસ્તુ તે દેવ જગન્નિવાસ
સર્વાત્મદૃક્ ત્વં પરમેશ્વરોઽસિ ।
પૃચ્છામિ તત્ત્વં પુરુષોત્તમસ્ય
સનાતનં ત્વં ચ સનાતનોઽસિ ॥ ૭॥

ગોપ્યં યદત્યન્તમનન્યવાચ્યં
વદન્તિ ભક્તેષુ મહાનુભાવાઃ ।
તદપ્યહોઽહં તવ દેવ ભક્તા
પ્રિયોઽસિ મે ત્વં વદ યત્તુ પૃષ્ટમ્ ॥ ૮॥

જ્ઞાનં સવિજ્ઞાનમથાનુભક્તિવૈરાગ્યયુક્તં
ચ મિતં વિભાસ્વત્ ।
જાનામ્યહં યોષિદપિ ત્વદુક્તં
યથા તથા બ્રૂહિ તરન્તિ યેન ॥ ૯॥

પૃચ્છામિ ચાન્યચ્ચ પરં રહસ્યં
તદેવ ચાગ્રે વદ વારિજાક્ષ ।
શ્રીરામચન્દ્રેઽખિલલોકસારે
ભક્તિર્દૃઢા નૌર્ભવતિ પ્રસિદ્ધા ॥ ૧૦॥

ભક્તિઃ પ્રસિદ્ધા ભવમોક્ષણાય
નાન્યત્તતઃ સાધનમસ્તિ કિઞ્ચિત્ ।
તથાપિ હૃત્સંશયબન્ધનં મે
વિભેત્તુમર્હસ્યમલોક્તિભિસ્ત્વમ્ ॥ ૧૧॥

વદન્તિ રામં પરમેકમાદ્યં
નિરસ્તમાયાગુણસમ્પ્રવાહમ્ ।
ભજન્તિ ચાહર્નિશમપ્રમત્તાઃ
પરં પદં યાન્તિ તથૈવ સિદ્ધાઃ ॥ ૧૨॥

વદન્તિ કેચિત્પરમોઽપિ રામઃ
સ્વાવિદ્યયા સંવૃતમાત્મસઞ્જ્ઞમ્ ।
જાનાતિ નાત્માનમતઃ પરેણ
સમ્બોધિતો વેદ પરાત્મતત્ત્વમ્ ॥ ૧૩॥

યદિ સ્મ જાનાતિ કુતો વિલાપઃ

સીતાકૃતેઽનેન કૃતઃ પરેણ ।
જાનાતિ નૈવં યદિ કેન સેવ્યઃ
સમો હિ સર્વૈરપિ જીવજાતૈઃ ॥ ૧૪॥

અત્રોત્તરં કિં વિદિતં ભવદ્ભિઃ
તદ્બ્રૂત મે સંશયભેદિ વાક્યમ્ ॥ ૧૫॥

શ્રીમહાદેવ ઉવાચ
ધન્યાસિ ભક્તાસિ પરાત્મનસ્ત્વં
યજ્જ્ઞાતુમિચ્છા તવ રામતત્ત્વમ્ ।
પુરા ન કેનાપ્યભિચોદિતોઽહં
વક્તું રહસ્યં પરમં નિગૂઢમ્ ॥ ૧૬॥

ત્વયાદ્ય ભક્ત્યા પરિનોદિતોઽહં
વક્ષ્યે નમસ્કૃત્ય રઘૂત્તમં તે ।
રામઃ પરાત્મા પ્રકૃતેરનાદિ-
રાનન્દ એકઃ પુરુષોત્તમો હિ ॥ ૧૭॥

સ્વમાયયા કૃત્સ્નમિદં હિ સૃષ્ટ્વા
નભોવદન્તર્બહિરાસ્થિતો યઃ ।
સર્વાન્તરસ્થોઽપિ નિગૂઢ આત્મા
સ્વમાયયા સૃષ્ટમિદં વિચષ્ટે ॥ ૧૮॥

જગન્તિ નિત્યં પરિતો ભ્રમન્તિ
યત્સન્નિધૌ ચુમ્બકલોહવદ્ધિ ।
એતન્ન જાનન્તિ વિમૂઢચિત્તાઃ
સ્વાવિદ્યયા સંવૃતમાનસા યે ॥ ૧૯॥

સ્વાજ્ઞાનમપ્યાત્મનિ શુદ્ધબુદ્ધે
સ્વારોપયન્તીહ નિરસ્તમાયે ।
સંસારમેવાનુસરન્તિ તે વૈ
પુત્રાદિસક્તાઃ પુરુકર્મયુક્તાઃ ॥ ૨૦॥

યથાઽપ્રકાશો ન તુ વિદ્યતે રવૌ
જ્યોતિઃસ્વભાવે પરમેશ્વરે તથા ।
વિશુદ્ધવિજ્ઞાનઘને રઘૂત્તમેઽવિદ્યા
કથં સ્યાત્પરતઃ પરાત્મનિ ॥ ૨૧॥

યથા હિ ચાક્ષ્ણા ભ્રમતા ગૃહાદિકં
   વિનષ્ટદૃષ્ટેર્ભ્રમતીવ દૃશ્યતે ।
તથૈવ દેહેન્દ્રિયકર્તુરાત્મનઃ
   કૃતે પરેઽધ્યસ્ય જનો વિમુહ્યતિ ॥ ૨૨॥

નાહો ન રાત્રિઃ સવિતુર્યથા ભવેત્
   પ્રકાશરૂપાવ્યભિચારતઃ ક્વચિત્ ।
જ્ઞાનં તથાજ્ઞાનમિદં દ્વયં હરૌ
   રામે કથં સ્થાસ્યતિ શુદ્ધચિદ્ઘને ॥ ૨૩॥

તસ્માત્પરાનન્દમયે રઘૂત્તમે
   વિજ્ઞાનરૂપે હિ ન વિદ્યતે તમઃ ।
અજ્ઞાનસાક્ષિણ્યરવિન્દલોચને
   માયાશ્રયત્વાન્ન હિ મોહકારણમ્ ॥ ૨૪॥

અત્ર તે કથયિષ્યામિ રહસ્યમપિ દુર્લભમ્ ।
સીતારામમરુત્સૂનુસંવાદં મોક્ષસાધનમ્ ॥ ૨૫॥

પુરા રામાયણે રામે રાવણં દેવકણ્ટકમ્ ।
હત્વા રણે રણશ્લાઘી સપુત્રબલવાહનમ્ ॥ ૨૬॥

સીતયા સહ સુગ્રીવલક્ષ્મણાભ્યાં સમન્વિતઃ ।
અયોધ્યામગમદ્રામો હનૂમત્પ્રમુખૈર્વૃતઃ ॥ ૨૭॥

અભિષિક્તઃ પરિવૃતો વસિષ્ઠાદ્યૈર્મહાત્મભિઃ ।
સિંહાસને સમાસીનઃ કોટિસૂર્યસમપ્રભઃ ॥ ૨૮॥

દૃષ્ટ્વા તદા હનૂમન્તં પ્રાઞ્જલિં પુરતઃ સ્થિતમ્ ।
કૃતકાર્યં નિરાકાઙ્ક્ષં જ્ઞાનાપેક્ષં મહામતિમ્ ॥ ૨૯॥

રામઃ સીતામુવાચેદં બ્રૂહિ તત્ત્વં હનૂમતે ।
નિષ્કલ્મષોઽયં જ્ઞાનસ્ય પાત્રં નો નિત્યભક્તિમાન્ ॥ ૩૦॥

તથેતિ જાનકી પ્રાહ તત્ત્વં રામસ્ય નિશ્ચિતમ્ ।
હનૂમતે પ્રપન્નાય સીતા લોકવિમોહિની ॥ ૩૧॥

સીતોવાચ

રામં વિદ્ધિ પરં બ્રહ્મ સચ્ચિદાનન્દમદ્વયમ્ ।

સર્વોપાધિવિનિર્મુક્તં સત્તામાત્રમગોચરમ્ ॥ ૩૨॥

આનન્દં નિર્મલં શાન્તં નિર્વિકારં નિરઞ્જનમ્ ।
સર્વવ્યાપિનમાત્માનં સ્વપ્રકાશમકલ્મષમ્ ॥ ૩૩॥

માં વિદ્ધિ મૂલપ્રકૃતિં સર્ગસ્થિત્યન્તકારિણીમ્ ।
તસ્ય સન્નિધિમાત્રેણ સૃજામીદમતન્દ્રિતા ॥ ૩૪॥

તત્સાન્નિધ્યાન્મયા સૃષ્ટં તસ્મિન્નારોપ્યતેઽબુધૈઃ ।
અયોધ્યાનગરે જન્મ રઘુવંશેઽતિનિર્મલે ॥ ૩૫॥

વિશ્વામિત્રસહાયત્વં મખસંરક્ષણં તતઃ ।
અહલ્યાશાપશમનં ચાપભઙ્ગો મહેશિતુઃ ॥ ૩૬॥

મત્પાણિગ્રહણં પશ્ચાદ્ભાર્ગવસ્ય મદક્ષયઃ ।
અયોધ્યાનગરે વાસો મયા દ્વાદશવાર્ષિકઃ ॥ ૩૭॥

દણ્ડકારણ્યગમનં વિરાધવધ એવ ચ ।
માયામારીચમરણં માયાસીતાહૃતિસ્તથા ॥ ૩૮॥

જટાયુષો મોક્ષલાભઃ કબન્ધસ્ય તથૈવ ચ ।
શબર્યાઃ પૂજનં પશ્ચાત્સુગ્રીવેણ સમાગમઃ ॥ ૩૯॥

વાલિનશ્ચ વધઃ પશ્ચાત્સીતાન્વેષણમેવ ચ ।
સેતુબન્ધશ્ચ જલધૌ લઙ્કાયાશ્ચ નિરોધનમ્ ॥ ૪૦॥

રાવણસ્ય વધો યુદ્ધે સપુત્રસ્ય દુરાત્મનઃ ।
વિભીષણે રાજ્યદાનં પુષ્પકેણ મયા સહ ॥ ૪૧॥

અયોધ્યાગમનં પશ્ચાદ્રાજ્યે રામાભિષેચનમ્ ।
એવમાદીનિ કર્માણિ મયૈવાચરિતાન્યપિ
આરોપયન્તિ રામેઽસ્મિન્નિર્વિકારેઽખિલાત્મનિ ॥ ૪૨॥

રામો ન ગચ્છતિ ન તિષ્ઠતિ નાનુશોચત્યાકાઙ્ક્ષતે
 ત્યજતિ નો ન કરોતિ કિઞ્ચિત્ ।
આનન્દમૂર્તિરચલઃ પરિણામહીનો
 માયાગુણાનનુગતો હિ તથા વિભાતિ ॥ ૪૩॥

તતો રામઃ સ્વયં પ્રાહ હનૂમન્તમુપસ્થિતમ્ ।
શ ृણુ તત્ત્વં પ્રવક્ષ્યામિ હ્યાત્માનાત્મપરાત્મનામ્ ॥ ૪૪॥

આકાશસ્ય યથા ભેદસ્ત્રિવિધો દૃશ્યતે મહાન્ ।
જલાશયે મહાકાશસ્તદવચ્છિન્ન એવ હિ ।
પ્રતિબિમ્બાખ્યમપરં દૃશ્યતે ત્રિવિધં નભઃ ॥ ૪૫॥

બુદ્ધ્યવચ્છિન્નચૈતન્યમેકં પૂર્ણમથાપરમ્ ।
આભાસસ્ત્વપરં બિમ્બભૂતમેવં ત્રિધા ચિતિઃ ॥ ૪૬॥

સાભાસબુદ્ધેઃ કર્તૃત્વમવિચ્છિન્નેઽવિકારિણિ ।
સાક્ષિણ્યારોપ્યતે ભ્રાન્ત્યા જીવત્વં ચ તથા બુધૈઃ ॥ ૪૭॥

આભાસસ્તુ મૃષા બુદ્ધિરવિદ્યાકાર્યમુચ્યતે ।
અવિચ્છિન્નં તુ તદ્બ્રહ્મ વિચ્છેદસ્તુ વિકલ્પતઃ ॥ ૪૮॥

અવિચ્છિન્નસ્ય પૂર્ણેન એકત્વં પ્રતિપાદ્યતે ।
તત્ત્વમસ્યાદિવાક્યૈશ્ચ સાભાસસ્યાહમસ્તથા ॥ ૪૯॥

ઐક્યજ્ઞાનં યદોત્પન્નં મહાવાક્યેન ચાત્મનોઃ ।
તદાઽવિદ્યા સ્વકાર્યૈશ્ચ નશ્યત્યેવ ન સંશયઃ ॥ ૫૦॥

એતદ્વિજ્ઞાય મદ્ભક્તો મદ્ભાવાયોપપદ્યતે ।
મદ્ભક્તિવિમુખાનાં હિ શાસ્ત્રગર્તેષુ મુહ્યતામ્ ।
ન જ્ઞાનં ન ચ મોક્ષઃ સ્યાત્તેષાં જન્મશતૈરપિ ॥ ૫૧॥

ઇદં રહસ્યં હૃદયં મમાત્મનો
    મયૈવ સાક્ષાત્કથિતં તવાનઘ ।
મદ્ભક્તિહીનાય શઠાય ન ત્વયા
    દાતવ્યમૈન્દ્રાદપિ રાજ્યતોઽધિકમ્ ॥ ૫૨॥

શ્રીમહાદેવ ઉવાચ

એતત્તેઽભિહિતં દેવિ શ્રીરામહૃદયં મયા ।
અતિગુહ્યતમં હૃદ્યં પવિત્રં પાપશોધનમ્ ॥ ૫૩॥

સાક્ષાદ્રામેણ કથિતં સર્વવેદાન્તસઙ્ગ્રહમ્ ।
યઃ પઠેત્સતતં ભક્ત્યા સ મુક્તો નાત્ર સંશયઃ ॥ ૫૪॥

બ્રહ્મહત્યાદિ પાપાનિ બહુજન્માર્જિતાન્યપિ ।
નશ્યન્ત્યેવ ન સન્દેહો રામસ્ય વચનં યથા ॥ ૫૫॥

યોઽતિભ્રષ્ટોઽતિપાપી પરધનપરદારેષુ નિત્યોદ્યતો વા

સ્તેયી બ્રહ્મઘ્નમાતાપિતૃવધનિરતો યોગિવૃન્દાપકારી
યઃ સમ્પૂજ્યાભિરામં પઠતિ ચ હૃદયં રામચન્દ્રસ્ય ભક્ત્યા
યોગીન્દ્રૈરપ્યલભ્યં પદમિહ લભતે સર્વદેવૈઃ સ પૂજ્યમ્ ॥ ૫૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે બાલકાણ્ડે
શ્રીરામહૃદયં નામ પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીયઃ સર્ગઃ॥

પાર્વત્યુવાચ
ધન્યાસ્મ્યનુગૃહીતાસ્મિ કૃતાર્થાસ્મિ જગત્પ્રભો ।
વિચ્છિન્નો મેઽતિસન્દેહગ્રન્થિર્ભવદનુગ્રહાત્ ॥ ૧॥

ત્વન્મુખાદ્ગલિતં રામતત્ત્વામૃતરસાયનમ્ ।
પિબન્ત્યા મે મનો દેવ ન તૃપ્યતિ ભવાપહમ્ ॥ ૨॥

શ્રીરામસ્ય કથા ત્વત્તઃ શ્રુતા સઙ્ક્ષેપતો મયા ।
ઇદાનીં શ્રોતુમિચ્છામિ વિસ્તરેણ સ્ફુટાક્ષરમ્ ॥ ૩॥

શ્રીમહાદેવ ઉવાચ
શૃણુ દેવિ પ્રવક્ષ્યામિ ગુહ્યાદ્ગુહ્યતરં મહત્ ।
અધ્યાત્મરામચરિતં રામેણોક્તં પુરા મમ ॥ ૪ ।
તદદ્ય કથયિષ્યામિ શૃણુ તાપત્રયાપહમ્ ।
યચ્છ્રુત્વા મુચ્યતે જન્તુરજ્ઞાનોત્થમહાભયાત્ ।
પ્રાપ્નોતિ પરમામૃદ્ધિમ્ દીર્ઘાયુઃ પુત્રસન્તતિમ્ ॥ ૫॥

ભૂમિર્ભારેણ મગ્ના દશવદનમુખાશેષરક્ષોગણાનાં
ધૃત્વા ગોરૂપમાદૌ દિવિજમુનિજનૈઃ સાકમબ્જાસનસ્ય ।
ગત્વા લોકં રુદન્તી વ્યસનમુપગતં બ્રહ્મણે પ્રાહ સર્વં
બ્રહ્મા ધ્યાત્વા મુહૂર્તં સકલમપિ હૃદાવેદશેષાત્મકત્વાત્ ॥ ૬॥

તસ્માત્ક્ષીરસમુદ્રતીરમગમદ્ બ્રહ્માથ દેવૈર્વૃતો
દેવ્યા ચાખિલલોકહૃત્સ્થમજરં સર્વજ્ઞમીશં હરિમ્ ।
અસ્તૌષીચ્છ્રુતિસિદ્ધનિર્મલપદૈઃ સ્તોત્રૈઃ પુરાણોદ્ભવૈઃ
ભક્ત્યા ગદ્ગદયા ગિરાતિવિમલૈરાનન્દબાષ્પૈર્વૃતઃ ॥ ૭॥

તતઃ સ્ફુરત્સહસ્રાંશુસહસ્રસદૃશપ્રભઃ ।
આવિરાસીદ્ધરિઃ પ્રાચ્યાં દિશાં વ્યપનયન્સ્તમઃ ॥ ૮॥

કથઞ્ચિદ્દૃષ્ટવાન્ બ્રહ્મા દુર્દર્શમકૃતાત્મનામ્ ।
ઇન્દ્રનીલપ્રતીકાશં સ્મિતાસ્યં પદ્મલોચનમ્ ॥ ૯॥

કિરીટહારકેયૂરકુણ્ડલૈઃ કટકાદિભિઃ ।
વિભ્રાજમાનં શ્રીવત્સકૌસ્તુભપ્રભયાન્વિતમ્ ॥ ૧૦॥

સ્તુવદ્ભિઃ સનકાદ્યૈશ્ચ પાર્ષદૈઃ પરિવેષ્ટિતમ્ ।
શઙ્ખચક્રગદાપદ્મવનમાલાવિરાજિતમ્ ॥ ૧૧॥

સ્વર્ણયજ્ઞોપવીતેન સ્વર્ણવર્ણામ્બરેણ ચ ।
શ્રિયા ભૂમ્યા ચ સહિતં ગરુડોપરિ સંસ્થિતમ્ ॥ ૧૨॥

હર્ષગદ્ગદયા વાચા સ્તોતું સમુપચક્રમે ॥ ૧૩॥

બ્રહ્મોવાચ

નતોઽસ્મિ તે પદં દેવ પ્રાણબુદ્ધીન્દ્રિયાત્મભિઃ ।
યચ્ચિન્ત્યતે કર્મપાશાદ્ધૃદિ નિત્યં મુમુક્ષુભિઃ ॥ ૧૪॥

માયયા ગુણમય્યા ત્વં સૃજસ્યવસિ લુમ્પસિ ।
જગત્તેન ન તે લેપ આનન્દાનુભવાત્મનઃ ॥ ૧૫॥

તથા શુદ્ધિર્ન દુષ્ટાનાં દાનાધ્યયનકર્મભિઃ ।
શુદ્ધાત્મતા તે યશસિ સદા ભક્તિમતાં યથા ॥ ૧૬॥

અતસ્તવાઙ્ઘ્રિર્મે દૃષ્ટશ્ચિત્તદોષાપનુત્તયે ।
સદ્યોઽન્તર્હૃદયે નિત્યં મુનિભિઃ સાત્વતૈર્વૃતઃ ॥ ૧૭॥

બ્રહ્માદ્યૈઃ સ્વાર્થસિદ્ધ્યર્થમસ્માભિઃ પૂર્વસેવિતઃ ।
અપરોક્ષાનુભૂત્યર્થં જ્ઞાનિભિર્હૃદિ ભાવિતઃ ॥ ૧૮॥

તવાઙ્ઘ્રિપૂજાનિર્માલ્યતુલસીમાલયા વિભો ।
સ્પર્ધતે વક્ષસિ પદં લબ્ધ્વાપિ શ્રીઃ સપત્નિવત્ ॥ ૧૯॥

અતસ્ત્વત્પાદભક્તેષુ તવ ભક્તિઃ શ્રિયોઽધિકા ।
ભક્તિમેવાભિવાઞ્છન્તિ ત્વદ્ભક્તાઃ સારવેદિનઃ ॥ ૨૦॥

અતસ્ત્વત્પાદકમલે ભક્તિરેવ સદાસ્તુ મે ।
સંસારાઽઽમયતપ્તાનાં ભેષજં ભક્તિરેવ તે ॥ ૨૧॥

ઇતિ બ્રુવન્તં બ્રહ્માણં બભાષે ભગવાન્ હરિઃ ।
કિં કરોમીતિ તં વેધાઃ પ્રત્યુવાચાતિહર્ષિતઃ ॥ ૨૨॥

ભગવન્ રાવણો નામ પૌલસ્ત્યતનયો મહાન્ ।
રાક્ષસાનામધિપતિર્મદ્દત્તવરદર્પિતઃ ॥ ૨૩॥

ત્રિલોકીં લોકપાલાન્શ્ચ બાધતે વિશ્વબાધકઃ ।
માનુષેણ મૃતિસ્તસ્ય મયા કલ્યાણ કલ્પિતા ॥ ૨૪॥

અતસ્ત્વં માનુષો ભૂત્વા જહિ દેવરિપું પ્રભો ॥ ૨૫॥

શ્રીભગવાનુવાચ

કશ્યપસ્ય વરો દત્તસ્તપસા તોષિતેન મે ।
યાચિતઃ પુત્રભાવાય તથેત્યઙ્ગીકૃતં મયા ।
સ ઇદાનીં દશરથો ભૂત્વા તિષ્ઠતિ ભૂતલે ॥ ૨૬॥

તસ્યાહં પુત્રતામેત્ય કૌસલ્યાયાં શુભે દિને ।
ચતુર્ધાઽઽત્માનમેવાહં સૃજામીતરયોઃ પૃથક્ ॥ ૨૭॥

યોગમાયાપિ સીતેતિ જનકસ્ય ગૃહે તદા ।
ઉત્પત્સ્યતે તયા સાર્ધં સર્વં સમ્પાદયામ્યહમ્ ।
ઇત્યુક્ત્વાન્તર્દધે વિષ્ણુર્બ્રહ્મા દેવાનથાબ્રવીત્ ॥ ૨૮॥

બ્રહ્મોવાચ

વિષ્ણુર્માનુષરૂપેણ ભવિષ્યતિ રઘોઃ કુલે ॥ ૨૯॥

યૂયં સૃજધ્વં સર્વેઽપિ વાનરેષ્વંશસમ્ભવાન્ ।
વિષ્ણોઃ સહાયં કુરુત યાવત્સ્થાસ્યતિ ભૂતલે ॥ ૩૦॥

ઇતિ દેવાન્ સમાદિશ્ય સમાશ્વાસ્ય ચ મેદિનીમ્ ।
યયૌ બ્રહ્મા સ્વભવનં વિજ્વરઃ સુખમાસ્થિતઃ ॥ ૩૧॥

દેવાશ્ચ સર્વે હરિરૂપધારિણઃ
    સ્થિતાઃ સહાયાર્થમિતસ્તતો હરેઃ ।
મહાબલાઃ પર્વતવૃક્ષયોધિનઃ
    પ્રતીક્ષમાણા ભગવન્તમીશ્વરમ્ ॥ ૩૨॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે

બાલકાણ્ડે દ્વિતીયઃ સર્ગઃ ॥ ૨॥

## ॥ તૃતીયઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
અથ રાજા દશરથઃ શ્રીમાન્ સત્યપરાયણઃ ।
અયોધ્યાધિપતિર્વીરઃ સર્વલોકેષુ વિશ્રુતઃ ॥ ૧॥

સોઽનપત્યત્વદુઃખેન પીડિતો ગુરુમેકદા ।
વસિષ્ઠં સ્વકુલાચાર્યમભિવાદ્યેદમબ્રવીત્ ॥ ૨॥

સ્વામિન્ પુત્રાઃ કથં મે સ્યુઃ સર્વલક્ષણલક્ષિતાઃ ।
પુત્રહીનસ્ય મે રાજ્યં સર્વં દુઃખાય કલ્પતે ॥ ૩॥

તતોઽબ્રવીદ્વસિષ્ઠસ્તં ભવિષ્યન્તિ સુતાસ્તવ ।
ચત્વારઃ સત્ત્વસમ્પન્ના લોકપાલા ઇવાપરાઃ ॥ ૪॥

શાન્તાભર્તારમાનીય ઋષ્યશ‍ૃઙ્ગં તપોધનમ્ ।
અસ્માભિઃ સહિતઃ પુત્રકામેષ્ટિં શીઘ્રમાચર ॥ ૫॥

તથેતિ મુનિમાનીય મન્ત્રિભિઃ સહિતઃ શુચિઃ ।
યજ્ઞકર્મ સમારેભે મુનિભિર્વીતકલ્મષૈઃ ॥ ૬॥

શ્રદ્ધયા હૂયમાનેઽગ્નૌ તપ્તજામ્બૂનદપ્રભઃ ।
પાયસં સ્વર્ણપાત્રસ્થં ગૃહીત્વોવાચ હવ્યવાટ્ ॥ ૭॥

ગૃહાણ પાયસં દિવ્યં પુત્રીયં દેવનિર્મિતમ્ ।
લપ્સ્યસે પરમાત્માનં પુત્રત્વેન ન સંશયઃ ॥ ૮॥

ઇત્યુક્ત્વા પાયસં દત્ત્વા રાજ્ઞે સોઽન્તર્દધેઽનલઃ ।
વવન્દે મુનિશાર્દૂલૌ રાજા લબ્ધમનોરથઃ ॥ ૯॥

વસિષ્ઠઋષ્યશ‍ૃઙ્ગાભ્યામનુજ્ઞાતો દદૌ હવિઃ ।
કૌસલ્યાયૈ સકૈકેય્યૈ અર્ધમર્ધં પ્રયત્નતઃ ॥ ૧૦॥

તતઃ સુમિત્રા સમ્પ્રાપ્તા જગૃધ્નુઃ પૌત્રિકં ચરુમ્ ।
કૌસલ્યા તુ સ્વભાગાર્ધં દદૌ તસ્યૈ મુદાન્વિતા ॥ ૧૧॥

કૈકેયી ચ સ્વભાગાર્ધં દદૌ પ્રીતિસમન્વિતા ।
ઉપભુજ્ય ચરું સર્વાઃ સ્ત્રિયો ગર્ભસમન્વિતાઃ ॥ ૧૨॥

દેવતા ઇવ રેજુસ્તાઃ સ્વભાસા રાજમન્દિરે ।
દશમે માસિ કૌસલ્યા સુષુવે પુત્રમદ્ભુતમ્ ॥ ૧૩॥

મધુમાસે સિતે પક્ષે નવમ્યાં કર્કટે શુભે ।
પુનર્વસ્વૃક્ષસહિતે ઉચ્ચસ્થે ગ્રહપઞ્ચકે ॥ ૧૪॥

મેષં પૂષણિ સમ્પ્રાપ્તે પુષ્પવૃષ્ટિસમાકુલે ।
આવિરાસીજ્જગન્નાથઃ પરમાત્મા સનાતનઃ ॥ ૧૫॥

નીલોત્પલદલશ્યામઃ પીતવાસાશ્ચતુર્ભુજઃ ।
જલજારુણનેત્રાન્તઃ સ્ફુરત્કુણ્ડલમણ્ડિતઃ ॥ ૧૬॥

સહસ્રાર્કપ્રતીકાશઃ કિરીટી કુઞ્ચિતાલકઃ ।
શઙ્ખચક્રગદાપદ્મવનમાલાવિરાજિતઃ ॥ ૧૭॥

અનુગ્રહાખ્યહૃત્સ્થેન્દુસૂચકસ્મિતચન્દ્રિકઃ ।
કરુણારસસમ્પૂર્ણવિશાલોત્પલલોચનઃ ।
શ્રીવત્સહારકેયૂરનૂપુરાદિવિભૂષણઃ ॥ ૧૮॥

દૃષ્ટ્વા તં પરમાત્માનં કૌસલ્યા વિસ્મયાકુલા ।
હર્ષાશ્રુપૂર્ણનયના નત્વા પ્રાઞ્જલિરબ્રવીત્ ॥ ૧૯॥

કૌસલ્યોવાચ

દેવદેવ નમસ્તેઽસ્તુ શઙ્ખચક્રગદાધર ।
પરમાત્માચ્યુતોઽનન્તઃ પૂર્ણસ્ત્વં પુરુષોત્તમઃ ॥ ૨૦॥

વદન્ત્યગોચરં વાચાં બુદ્ધ્યાદીનામતીન્દ્રિયમ્ ।
ત્વાં વેદવાદિનઃ સત્તામાત્રં જ્ઞાનૈકવિગ્રહમ્ ॥ ૨૧॥

ત્વમેવ માયયા વિશ્વં સૃજસ્યવસિ હન્સિ ચ ।
સત્ત્વાદિગુણસંયુક્તસ્તુર્ય એવામલઃ સદા ॥ ૨૨॥

કરોષીવ ન કર્તા ત્વં ગચ્છસીવ ન ગચ્છસિ ।
શ‍ૃણોષિ ન શ‍ૃણોષીવ પશ્યસીવ ન પશ્યસિ ॥ ૨૩॥

અપ્રાણો હ્યમનાઃ શુદ્ધ ઇત્યાદિ શ્રુતિરબ્રવીત્ ।
સમઃ સર્વેષુ ભૂતેષુ તિષ્ઠન્નપિ ન લક્ષ્યસે ॥ ૨૪॥

અજ્ઞાનધ્વાન્તચિત્તાનાં વ્યક્ત એવ સુમેધસામ્ ।
જઠરે તવ દૃશ્યન્તે બ્રહ્માણ્ડાઃ પરમાણવઃ ॥ ૨૫॥

ત્વં મમોદરસમ્ભૂત ઇતિ લોકાન્ વિડમ્બસે ।
ભક્તેષુ પારવશ્યં તે દૃષ્ટં મેઽદ્ય રઘૂત્તમ ॥ ૨૬॥

સંસારસાગરે મગ્ના પતિપુત્રધનાદિષુ ।
ભ્રમામિ માયયા તેઽદ્ય પાદમૂલમુપાગતા ॥ ૨૭॥

દેવ ત્વદ્રૂપમેતન્મે સદા તિષ્ઠતુ માનસે ।
આવૃણોતુ ન માં માયા તવ વિશ્વવિમોહિની ॥ ૨૮॥

ઉપસંહર વિશ્વાત્મન્નદો રૂપમલૌકિકમ્ ।
દર્શયસ્વ મહાનન્દબાલભાવં સુકોમલમ્ ।
લલિતાલિઙ્ગનાલાપૈસ્તરિષ્યામ્યુત્કટં તમઃ ॥ ૨૯॥

શ્રીભગવાનુવાચ
યદ્યદિષ્ટં તવાસ્ત્યમ્બ તત્તદ્ભવતુ નાન્યથા ॥ ૩૦॥

અહં તુ બ્રહ્મણા પૂર્વં ભૂમેર્ભારાપનુત્તયે ।
પ્રાર્થિતો રાવણં હન્તું માનુષત્વમુપાગતઃ ॥ ૩૧॥

ત્વયા દશરથેનાહં તપસારાધિતઃ પુરા ।
મત્પુત્રત્વાભિકાઙ્ક્ષિણ્યા તથા કૃતમનિન્દિતે ॥ ૩૨॥

રૂપમેતત્ત્વયા દૃષ્ટં પ્રાક્તનં તપસઃ ફલમ્ ।
મદ્દર્શનં વિમોક્ષાય કલ્પતે હ્યન્યદુર્લભમ્ ॥ ૩૩॥

સંવાદમાવયોર્યસ્તુ પઠેદ્વા શૃણુયાદપિ ।
સ યાતિ મમ સારૂપ્યં મરણે મત્સ્મૃતિં લભેત્ ॥ ૩૪॥

ઇત્યુક્ત્વા માતરં રામો બાલો ભૂત્વા રુરોદ હ ।
બાલત્વેઽપીન્દ્રનીલાભો વિશાલાક્ષોઽતિસુન્દરઃ ॥ ૩૫॥

બાલારુણપ્રતીકાશો લાલિતાખિલલોકપઃ ।
અથ રાજા દશરથઃ શ્રુત્વા પુત્રોદ્ભવોત્સવમ્ ।
આનન્દાર્ણવમગ્નોઽસાવાયયૌ ગુરુણા સહ ॥ ૩૬॥

રામં રાજીવપત્રાક્ષં દૃષ્ટ્વા હર્ષાશ્રુસમ્પ્લુતઃ ।
ગુરુણા જાતકર્માણિ કર્તવ્યાનિ ચકાર સઃ ॥ ૩૭॥

કૈકેયી ચાથ ભરતમસૂત કમલેક્ષણા ।
સુમિત્રાયાં યમૌ જાતૌ પૂર્ણેન્દુસદૃશાનનૌ ॥ ૩૮॥

તદા ગ્રામસહસ્રાણિ બ્રાહ્મણેભ્યો મુદા દદૌ ।
સુવર્ણાનિ ચ રત્નાનિ વાસાંસિ સુરભીઃ શુભાઃ ॥ ૩૯॥

યસ્મિન્ રમન્તે મુનયો વિદ્યયા જ્ઞાનવિપ્લવે ।
તં ગુરુઃ પ્રાહ રામેતિ રમણાદ્રામ ઇત્યપિ ॥ ૪૦॥

ભરણાદ્ભરતો નામ લક્ષ્મણં લક્ષણાન્વિતમ્ ।
શત્રુઘ્નં શત્રુહન્તારમેવં ગુરુરભાષત ॥ ૪૧॥

લક્ષ્મણો રામચન્દ્રેણ શત્રુઘ્નો ભરતેન ચ ।
દ્વન્દ્વીભૂય ચરન્તૌ તૌ પાયસાંશાનુસારતઃ ॥ ૪૨॥

રામસ્તુ લક્ષ્મણેનાથ વિચરન્ બાલલીલયા ।
રમયામાસ પિતરૌ ચેષ્ટિતૈર્મુગ્ધભાષિતૈઃ ॥ ૪૩॥

ભાલે સ્વર્ણમયાશ્વત્થપર્ણમુક્તાફલપ્રભમ્ ।
કણ્ઠે રત્નમણિવ્રાતમધ્યદ્વીપિનખાઞ્ચિતમ્ ॥ ૪૪॥

કર્ણયોઃ સ્વર્ણસમ્પન્નરત્નાર્જુનસટાલુકમ્ ।
શિઞ્જાનમણિમઞ્જીરકટિસૂત્રાઙ્ગદૈર્વૃતમ્ ॥ ૪૫॥

સ્મિતવક્ત્રાલ્પદશનમિન્દ્રનીલમણિપ્રભમ્ ।
અઙ્ગણે રિઙ્ગમાણં તં તર્ણકાનનુ સર્વતઃ ।
દૃષ્ટ્વા દશરથો રાજા કૌસલ્યા મુમુદે તદા ॥ ૪૬॥

ભોક્ષ્યમાણો દશરથો રામમેહીતિ ચાસકૃત્ ।
આહ્વયત્યતિહર્ષેણ પ્રેમ્ણા નાયાતિ લીલયા ॥ ૪૭॥

આનયેતિ ચ કૌસલ્યામાહ સા સસ્મિતા સુતમ્ ।
ધાવત્યપિ ન શક્નોતિ સ્પ્રષ્ટું યોગિમનોગતિમ્ ॥ ૪૮॥

પ્રહસન્ સ્વયમાયાતિ કર્દમાઙ્કિતપાણિના ।
કિઞ્ચિદ્ગૃહીત્વા કવલં પુનરેવ પલાયતે ॥ ૪૯॥

કૌસલ્યા જનની તસ્ય માસિ માસિ પ્રકુર્વતી ।
વાયનાનિ વિચિત્રાણિ સમલઙ્કૃત્ય રાઘવમ્ ॥ ૫૦॥

અપૂપાન્ મોદકાન્ કૃત્વા કર્ણશષ્કુલિકાસ્તથા ।

કર્ણપૂરાન્શ્ચ વિવિધાન્ વર્ષવૃદ્ધૌ ચ વાયનમ્ ॥ ૫૧॥

ગૃહકૃત્યં તયા ત્યક્તં તસ્ય ચાપલ્યકારણાત્ ।
એકદા રઘુનાથોऽસૌ ગતો માતરમન્તિકે ॥ ૫૨॥

ભોજનં દેહિ મે માતર્ન શ્રુતં કાર્યસક્તયા ।
તતઃ ક્રોધેન ભાણ્ડાનિ લગુડેનાહનત્તદા ॥ ૫૩॥

શિક્યસ્થં પાતયામાસ ગવ્યં ચ નવનીતકમ્ ।
લક્ષ્મણાય દદૌ રામો ભરતાય યથાક્રમમ્ ॥ ૫૪॥

શત્રુઘ્નાય દદૌ પશ્ચાદ્દધિ દુગ્ધં તથૈવ ચ ।
સૂદેન કથિતે માત્રે હાસ્યં કૃત્વા પ્રધાવતિ ॥ ૫૫॥

આગતાં તાં વિલોક્યાથ તતઃ સર્વૈઃ પલાયિતમ્ ।
કૌસલ્યા ધાવમાનાપિ પ્રસ્ખલન્તી પદે પદે ॥ ૫૬॥

રઘુનાથં કરે ધૃત્વા કિઞ્ચિન્નોવાચ ભામિની ।
બાલભાવં સમાશ્રિત્ય મન્દં મન્દં રુરોદ હ ॥ ૫૭॥

તે સર્વે લાલિતા માત્રા ગાઢમાલિઙ્ગ્ય યત્નતઃ ।
એવમાનન્દસન્દોહજગદાનન્દકારકઃ ॥ ૫૮॥

માયાબાલવપુર્ધૃત્વા રમયામાસ દમ્પતી ।
અથ કાલેન તે સર્વે કૌમારં પ્રતિપેદિરે ॥ ૫૯॥

ઉપનીતા વસિષ્ઠેન સર્વવિદ્યાવિશારદાઃ ।
ધનુર્વેદે ચ નિરતાઃ સર્વશાસ્ત્રાર્થવેદિનઃ ॥ ૬૦॥

બભૂવુર્જગતાં નાથા લીલયા નરરૂપિણઃ ।
લક્ષ્મણસ્તુ સદા રામમનુગચ્છતિ સાદરમ્ ॥ ૬૧॥

સેવ્યસેવકભાવેન શત્રુઘ્નો ભરતં તથા ।
રામશ્ચાપધરો નિત્યં તૂણીબાણાન્વિતઃ પ્રભુઃ ॥ ૬૨॥

અશ્વારૂઢો વનં યાતિ મૃગયાયૈ સલક્ષ્મણઃ ।
હત્વા દુષ્ટમૃગાન્ સર્વાન્ પિત્રે સર્વં ન્યવેદયત્ ॥ ૬૩॥

પ્રાતરુત્થાય સુસ્નાતઃ પિતરાવભિવાદ્ય ચ ।
પૌરકાર્યાણિ સર્વાણિ કરોતિ વિનયાન્વિતઃ ॥ ૬૪॥

બન્ધુભિઃ સહિતો નિત્યં ભુક્ત્વા મુનિભિરન્વહમ્ ।
ધર્મશાસ્ત્રરહસ્યાનિ શૃણોતિ વ્યાકરોતિ ચ ॥ ૬૫॥

એવં પરાત્મા મનુજાવતારો મનુષ્યલોકાનનુસૃત્ય સર્વમ્ ।
ચક્રેઽવિકારી પરિણામહીનો વિચાર્યમાણે ન કરોતિ કિઞ્ચિત્ ॥ ૬૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
બાલકાણ્ડે તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
કદાચિત્કૌશિકોઽભ્યાગાદયોધ્યાં જ્વલનપ્રભઃ ।
દ્રષ્ટું રામં પરાત્માનં જાતં જ્ઞાત્વા સ્વમાયયા ॥ ૧॥

દૃષ્ટ્વા દશરથો રાજા પ્રત્યુત્થાયાચિરેણ તુ ।
વસિષ્ઠેન સમાગમ્ય પૂજયિત્વા યથાવિધિ ॥ ૨॥

અભિવાદ્ય મુનિં રાજા પ્રાઞ્જલિર્ભક્તિનમ્રધીઃ ।
કૃતાર્થોઽસ્મિ મુનીન્દ્રાહં ત્વદાગમનકારણાત્ ॥ ૩॥

ત્વદ્વિધા યદ્ગૃહમ્ યાન્તિ તત્રૈવાયાન્તિ સમ્પદઃ ।
યદર્થમાગતોઽસિ ત્વં બ્રૂહિ સત્યં કરોમિ તત્ ॥ ૪॥

વિશ્વામિત્રોઽપિ તં પ્રીતઃ પ્રત્યુવાચ મહીપતિમ્ ।
અહં પર્વણિ સમ્પ્રાપ્તે દૃષ્ટ્વા યષ્ટું સુરાન્ પિતૄન્ ॥ ૫॥

યદારભે તદા દૈત્યા વિઘ્નં કુર્વન્તિ નિત્યશઃ ।
મારીચશ્ચ સુબાહુશ્ચાપરે ચાનુચરાસ્તયોઃ ॥ ૬॥

અતસ્તયોર્વધાર્થાય જ્યેષ્ઠં રામં પ્રયચ્છ મે ।
લક્ષ્મણેન સહ ભ્રાત્રા તવ શ્રેયો ભવિષ્યતિ ॥ ૭॥

વસિષ્ઠેન સહામન્ત્ર્ય દીયતાં યદિ રોચતે ।
પપ્રચ્છ ગુરુમેકાન્તે રાજા ચિન્તાપરાયણઃ ॥ ૮॥

કિં કરોમિ ગુરો રામં ત્યક્તું નોત્સહતે મનઃ ।
બહુવર્ષસહસ્રાન્તે કષ્ટેનોત્પાદિતાઃ સુતાઃ ॥ ૯॥

ચત્વારોઽમરતુલ્યાસ્તે તેષાં રામોઽતિવલ્લભઃ ।
રામસ્ત્વિતો ગચ્છતિ ચેન્ન જીવામિ કથઞ્ચન ॥ ૧૦॥

પ્રત્યાખ્યાતો યદિ મુનિઃ શાપં દાસ્યત્યસંશયઃ ।
કથં શ્રેયો ભવેન્મહ્યમસત્યં ચાપિ ન સ્પૃશેત્ ॥ ૧૧॥

વસિષ્ઠ ઉવાચ
શ‍ૃણુ રાજન્ દેવગુહ્યં ગોપનીયં પ્રયત્નતઃ ।
રામો ન માનુષો જાતઃ પરમાત્મા સનાતનઃ ॥ ૧૨॥

ભૂમેર્ભારાવતારાય બ્રહ્મણા પ્રાર્થિતઃ પુરા ।
સ એવ જાતો ભવને કૌસલ્યાયાં તવાનઘ ॥ ૧૩॥

ત્વં તુ પ્રજાપતિઃ પૂર્વં કશ્યપો બ્રહ્મણઃ સુતઃ ।
કૌસલ્યા ચાદિતિર્દેવમાતા પૂર્વં યશસ્વિની ॥ ૧૪॥

ભવન્તૌ તપ ઉગ્રં વૈ તેપાથે બહુવત્સરમ્ ।
અગ્રામ્યવિષયૌ વિષ્ણુપૂજાધ્યાનૈકતત્પરૌ ।
તદા પ્રસન્નો ભગવાન્ વરદો ભક્તવત્સલઃ ॥ ૧૫॥

વૃણીષ્વ વરમિત્યુક્તે ત્વં મે પુત્રો ભવામલ ।
ઇતિ ત્વયા યાચિતોઽસૌ ભગવાન્ ભૂતભાવનઃ ॥ ૧૬॥

તથેત્યુક્ત્વાદ્ય પુત્રસ્તે જાતો રામઃ સ એવ હિ ।
શેષસ્તુ લક્ષ્મણો રાજન્ રામમેવાન્વપદ્યત ॥ ૧૭॥

જાતૌ ભરતશત્રુઘ્નૌ શઙ્ખચક્રે ગદાભૃતઃ ।
યોગમાયાપિ સીતેતિ જાતા જનકનન્દિની ॥ ૧૮॥

વિશ્વામિત્રોઽપિ રામાય તાં યોજયિતુમાગતઃ ।
એતદ્ગુહ્યતમં રાજન્ન વક્તવ્યં કદાચન ॥ ૧૯॥

અતઃ પ્રીતેન મનસા પૂજયિત્વાથ કૌશિકમ્ ।
પ્રેષયસ્વ રમાનાથં રાઘવં સહલક્ષ્મણમ્ ॥ ૨૦॥

વસિષ્ઠેનૈવમુક્તસ્તુ રાજા દશરથસ્તદા ।
કૃતકૃત્યમિવાત્માનં મેને પ્રમુદિતાન્તરઃ ॥ ૨૧॥

આહૂય રામરામેતિ લક્ષ્મણેતિ ચ સાદરમ્ ।

આલિઙ્ગ્ય મૂર્ધ્ન્યવઘ્રાય કૌશિકાય સમર્પયત્ ॥ ૨૨॥

તતોઽતિહૃષ્ટો ભગવાન્ વિશ્વામિત્રઃ પ્રતાપવાન્ ।
આશીર્ભિરભિનન્દ્યાથ આગતૌ રામલક્ષ્મણૌ ।
ગૃહીત્વા ચાપતૂણીરબાણખડ્ગધરૌ યયૌ ॥ ૨૩॥

કિઞ્ચિદ્દેશમતિક્રમ્ય રામમાહૂય ભક્તિતઃ ।
દદૌ બલાં ચાતિબલાં વિદ્યે દ્વે દેવનિર્મિતે ॥ ૨૪॥

યયોર્ગ્રહણમાત્રેણ ક્ષુત્ક્ષામાદિ ન જાયતે ॥ ૨૫॥

તત ઉત્તીર્ય ગઙ્ગાં તે તાટકાવનમાગમન્ ।
વિશ્વામિત્રસ્તદા પ્રાહ રામં સત્યપરાક્રમમ્ ॥ ૨૬॥

અત્રાસ્તિ તાટકા નામ રાક્ષસી કામરૂપિણી ।
બાધતે લોકમખિલં જહિ તામવિચારયન્ ॥ ૨૭॥

તથેતિ ધનુરાદાય સગુણં રઘુનન્દનઃ ।
ટઙ્કારમકરોત્તેન શબ્દેનાપૂરયદ્વનમ્ ॥ ૨૮॥

તચ્છ્રુત્વાસહમાના સા તાટકા ઘોરરૂપિણી ।
ક્રોધસંમૂર્ચ્છિતા રામમભિદુદ્રાવ મેઘવત્ ॥ ૨૯॥

તામેકેન શરેણાશુ તાડયામાસ વક્ષસિ ।
પપાત વિપિને ઘોરા વમન્તી રુધિરં બહુ ॥ ૩૦॥

તતોઽતિસુન્દરી યક્ષી સર્વાભરણભૂષિતા ।
શાપાત્પિશાચતાં પ્રાપ્તા મુક્તા રામપ્રસાદતઃ ॥ ૩૧॥

નત્વા રામં પરિક્રમ્ય ગતા રામાજ્ઞયા દિવમ્ ॥ ૩૨॥

તતોઽતિહૃષ્ટઃ પરિરભ્ય રામં
    મૂર્ધન્યવઘ્રાય વિચિન્ત્ય કિઞ્ચિત્ ।
સર્વાસ્ત્રજાલં સરહસ્યમન્ત્રં
    પ્રીત્યાભિરામાય દદૌ મુનીન્દ્રઃ ॥ ૩૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
બાલકાણ્ડે ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ

તત્ર કામાશ્રમે રમ્યે કાનને મુનિસઙ્કુલે ।
ઉષિત્વા રજનીમેકાં પ્રભાતે પ્રસ્થિતાઃ શનૈઃ ॥ ૧॥

સિદ્ધાશ્રમં ગતાઃ સર્વે સિદ્ધચારણસેવિતમ્ ।
વિશ્વામિત્રેણ સન્દિષ્ટા મુનયસ્તન્નિવાસિનઃ ॥ ૨॥

પૂજાં ચ મહતીં ચક્રૂ રામલક્ષ્મણયોર્દ્રુતમ્ ।
શ્રીરામઃ કૌશિકં પ્રાહ મુને દીક્ષાં પ્રવિશ્યતામ્ ॥ ૩॥

દર્શયસ્વ મહાભાગ કુતસ્તૌ રાક્ષસાધમૌ ।
તથેત્યુક્ત્વા મુનિર્યષ્ટુમારેભે મુનિભિઃ સહ ॥ ૪॥

મધ્યાહ્ને દદૃશાતે તૌ રાક્ષસૌ કામરૂપિણૌ ।
મારીચશ્ચ સુબાહુશ્ચ વર્ષન્તૌ રુધિરાસ્થિની ॥ ૫॥

રામોઽપિ ધનુરાદાય દ્વૌ બાણૌ સન્દધે સુધીઃ ।
આકર્ણાન્તં સમાકૃષ્ય વિસસર્જ તયોઃ પૃથક્ ॥ ૬॥

તયોરેકસ્તુ મારીચં ભ્રામયઞ્છતયોજનમ્ ।
પાતયામાસ જલધૌ તદદ્ભુતમિવાભવત્ ॥ ૭॥

દ્વિતીયોઽગ્નિમયો બાણઃ સુબાહુમજયત્ક્ષણાત્ ।
અપરે લક્ષમણેનાશુ હતાસ્તદનુયાયિનઃ ॥ ૮॥

પુષ્પૌઘૈરાકિરન્ દેવા રાઘવં સહલક્ષ્મણમ્ ।
દેવદુન્દુભયો નેદુસ્તુષ્ટુવુઃ સિદ્ધચારણાઃ ॥ ૯॥

વિશ્વામિત્રસ્તુ સમ્પૂજ્ય પૂજાર્હં રઘુનન્દનમ્ ।
અઙ્કે નિવેશ્ય ચાલિઙ્ગ્ય ભક્ત્યા બાષ્પાકુલેક્ષણઃ ॥ ૧૦॥

ભોજયિત્વા સહ ભ્રાત્રા રામં પક્વફલાદિભિઃ ।
પુરાણવાક્યૈર્મધુરૈર્નિનાય દિવસત્રયમ્ ॥ ૧૧॥

ચતુર્થેઽહનિ સમ્પ્રાપ્તે કૌશિકો રામમબ્રવીત્ ।
રામ રામ મહાયજ્ઞં દ્રષ્ટું ગચ્છામહે વયમ્ ॥ ૧૨॥

વિદેહરાજનગરે જનકસ્ય મહાત્મનઃ ।
તત્ર માહેશ્વરં ચાપમસ્તિ ન્યસ્તં પિનાકિના ॥ ૧૩॥

દ્રક્ષ્યસિ ત્વં મહાસત્ત્વં પૂજ્યસે જનકેન ચ ।
ઇત્યુક્ત્વા મુનિભિસ્તાભ્યાં યયૌ ગઙ્ગાસમીપગમ્ ॥ ૧૪॥

ગૌતમસ્યાશ્રમં પુણ્યં યત્રાહલ્યાઽઽસ્થિતા તપઃ ।
દિવ્યપુષ્પફલોપેતપાદપૈઃ પરિવેષ્ટિતમ્ ॥ ૧૫॥

મૃગપક્ષિગણૈર્હીનં નાનાજન્તુવિવર્જિતમ્ ।
દૃષ્ટ્વોવાચ મુનિં શ્રીમાન્ રામો રાજીવલોચનઃ ॥ ૧૬॥

કસ્યૈતદાશ્રમપદં ભાતિ ભાસ્વચ્છુભં મહત્ ।
પત્રપુષ્પફલૈર્યુક્તં જન્તુભિઃ પરિવર્જિતમ્ ॥ ૧૭॥

આહ્લાદયતિ મે ચેતો ભગવન્ બ્રૂહિ તત્ત્વતઃ ॥ ૧૮॥

વિશ્વામિત્ર ઉવાચ

શ‍ૃણુ રામ પુરા વૃત્તં ગૌતમો લોકવિશ્રુતઃ ।
સર્વધર્મભૃતાં શ્રેષ્ઠસ્તપસારાધયન્ હરિમ્ ॥ ૧૯॥

તસ્મૈ બ્રહ્મા દદૌ કન્યામહલ્યાં લોકસુન્દરીમ્ ।
બ્રહ્મચર્યેણ સન્તુષ્ટઃ શુશ્રૂષણપરાયણામ્ ॥ ૨૦॥

તયા સાર્ધમિહાવાત્સીદ્ગૌતમસ્તપતાં વરઃ ।
શક્રસ્તુ તાં ધર્ષયિતુમન્તરં પ્રેપ્સુરન્વહમ્ ॥ ૨૧॥

કદાચિન્મુનિવેષેણ ગૌતમે નિર્ગતે ગૃહાત્ ।
ધર્ષયિત્વાથ નિરગાત્ત્વરિતં મુનિરપ્યગાત્ ॥ ૨૨॥

દૃષ્ટ્વા યાન્તં સ્વરૂપેણ મુનિઃ પરમકોપનઃ ।
પપ્રચ્છ કસ્ત્વં દુષ્ટાત્મન્ મમ રૂપધરોઽધમઃ ॥ ૨૩॥

સત્યં બ્રૂહિ ન ચેદ્ભસ્મ કરિષ્યામિ ન સંશયઃ ।
સોઽબ્રવીદ્દેવરાજોઽહં પાહિ માં કામકિઙ્કરમ્ ॥ ૨૪॥

કૃતં જુગુપ્સિતં કર્મ મયા કુત્સિતચેતસા ।
ગૌતમઃ ક્રોધતામ્રાક્ષઃ શશાપ દિવિજાધિપમ્ ॥ ૨૫॥

યોનિલમ્પટ દુષ્ટાત્મન્ સહસ્રભગવાન્ ભવ ।
શપ્ત્વા તં દેવરાજાનં પ્રવિશ્ય સ્વાશ્રમં દ્રુતમ્ ॥ ૨૬॥

દૃષ્ટ્વાહલ્યાં વેપમાનાં પ્રાઞ્જલિં ગૌતમોઽબ્રવીત્ ।

દુષ્ટે ત્વં તિષ્ઠ દુર્વૃત્તે શિલાયામાશ્રમે મમ ॥ ૨૭॥

નિરાહારા દિવારાત્રં તપઃ પરમમાસ્થિતા ।
આતપાનિલવર્ષાદિસહિષ્ણુઃ પરમેશ્વરમ્ ॥ ૨૮॥

ધ્યાયન્તી રામમેકાગ્રમનસા હૃદિ સંસ્થિતમ્ ।
નાનાજન્તુવિહીનોઽયમાશ્રમો મે ભવિષ્યતિ ॥ ૨૯॥

એવં વર્ષસહસ્રેષુ હ્યનેકેષુ ગતેષુ ચ ।
રામો દાશરથિઃ શ્રીમાનાગમિષ્યતિ સાનુજઃ ॥ ૩૦॥

યદા ત્વદાશ્રયશિલાં પાદાભ્યામાક્રમિષ્યતિ ।
તદૈવ ધૂતપાપા ત્વં રામં સમ્પૂજ્ય ભક્તિતઃ ॥ ૩૧॥

પરિક્રમ્ય નમસ્કૃત્ય સ્તુત્વા શાપાદ્વિમોક્ષ્યસે ।
પૂર્વવન્મમ શુશ્રૂષાં કરિષ્યસિ યથાસુખમ્ ॥ ૩૨॥

ઇત્યુક્ત્વા ગૌતમઃ પ્રાગાદ્ધિમવન્તં નગોત્તમમ્ ।
તદાદ્યહલ્યા ભૂતાનામદૃશ્યા સ્વાશ્રમે શુભે ॥ ૩૩॥

તવ પાદરજઃસ્પર્શં કાઙ્ક્ષતે પવનાશના ।
આસ્તેઽદ્યાપિ રઘુશ્રેષ્ઠ તપો દુષ્કરમાસ્થિતા ॥ ૩૪॥

પાવયસ્વ મુનેર્ભાર્યામહલ્યાં બ્રહ્મણઃ સુતામ્ ।
ઇત્યુક્ત્વા રાઘવં હસ્તે ગૃહીત્વા મુનિપુઙ્ગવઃ ॥ ૩૫॥

દર્શયામાસ ચાહલ્યામુગ્રેણ તપસા સ્થિતામ્ ।
રામઃ શિલાં પદા સ્પૃષ્ટ્વા તાં ચાપશ્યત્તપોધનામ્ ॥ ૩૬॥

નનામ રાઘવોઽહલ્યાં રામોઽહમિતિ ચાબ્રવીત્ ।
તતો દૃષ્ટ્વા રઘુશ્રેષ્ઠં પીતકૌશેયવાસસમ્ ॥ ૩૭॥

ચતુર્ભુજં શઙ્ખચક્રગદાપઙ્કજધારિણમ્ ।
ધનુર્બાણધરં રામં લક્ષ્મણેન સમન્વિતમ્ ॥ ૩૮॥

સ્મિતવક્ત્રં પદ્મનેત્રં શ્રીવત્સાઙ્કિતવક્ષસમ્ ।
નીલમાણિક્યસઙ્કાશં દ્યોતયન્તં દિશો દશ ॥ ૩૯॥

દૃષ્ટ્વા રામં રમાનાથં હર્ષવિસ્ફારિતેક્ષણા ।
ગૌતમસ્ય વચઃ સ્મૃત્વા જ્ઞાત્વા નારાયણં વરમ્ ॥ ૪૦॥

સમ્પૂજ્ય વિધિવદ્રામમર્ઘ્યાદિભિરનિન્દિતા ।
હર્ષાશ્રુજલનેત્રાન્તા દણ્ડવત્પ્રણિપત્ય સા ॥ ૪૧॥

ઉત્થાય ચ પુનર્દૃષ્ટ્વા રામં રાજીવલોચનમ્ ।
પુલકાઙ્કિતસર્વાઙ્ગા ગિરા ગદ્ગદયૈલત ॥ ૪૨॥

અહલ્યોવાચ

અહો કૃતાર્થાસ્મિ જગન્નિવાસ તે
પાદાબ્જસંલગ્નરજઃકણાદહમ્ ।
સ્પૃશામિ યત્પદ્મજશઙ્કરાદિભિ-
ર્વિમૃગ્યતે રન્ધિતમાનસૈઃ સદા ॥ ૪૩॥

અહો વિચિત્રં તવ રામ ચેષ્ટિતં
મનુષ્યભાવેન વિમોહિતં જગત્ ।
ચલસ્યજસ્રં ચરણાદિવર્જિતઃ
સમ્પૂર્ણ આનન્દમયોઽતિમાયિકઃ ॥ ૪૪॥

યત્પાદપઙ્કજપરાગપવિત્રગાત્રા
ભાગીરથી ભવવિરિઞ્ચિમુખાન્ પુનાતિ ।
સાક્ષાત્સ એવ મમ દૃગ્વિષયો યદાસ્તે
કિં વર્ણ્યતે મમ પુરાકૃતભાગધેયમ્ ॥ ૪૫॥

મર્ત્યાવતારે મનુજાકૃતિં હરિં
રામાભિધેયં રમણીયદેહિનમ્ ।
ધનુર્ધરં પદ્મવિશાલલોચનં
ભજામિ નિત્યં ન પરાન્ ભજિષ્યે ॥ ૪૬॥

યત્પાદપઙ્કજરજઃ શ્રુતિભિર્વિમૃગ્યં
યન્નાભિપઙ્કજભવઃ કમલાસનશ્ચ ।
યન્નામસારરસિકો ભગવાન્ પુરારિસ્તં
રામચન્દ્રમનિશં હૃદિ ભાવયામિ ॥ ૪૭॥

યસ્યાવતારચરિતાનિ વિરિઞ્ચિલોકે
ગાયન્તિ નારદમુખા ભવપદ્મજાદ્યાઃ ।
આનન્દજાશ્રુપરિષિક્તકુચાગ્રસીમા
વાગીશ્વરી ચ તમહં શરણં પ્રપદ્યે ॥ ૪૮॥

સોઽયં પરાત્મા પુરુષઃ પુરાણ
એકઃ સ્વયઞ્જ્યોતિરનન્ત આદ્યઃ ।
માયાતનું લોકવિમોહનીયાં
ધત્તે પરાનુગ્રહ એષ રામઃ ॥ ૪૯॥

અયં હિ વિશ્વોદ્ભવસંયમાનામેકઃ
સ્વમાયાગુણબિમ્બિતો યઃ ।
વિરિઞ્ચિવિષ્ણ્વીશ્વરનામભેદાન્
ધત્તે સ્વતન્ત્રઃ પરિપૂર્ણ આત્મા ॥ ૫૦॥

નમોઽસ્તુ તે રામ તવાઙ્ઘ્રિપઙ્કજં
શ્રિયા ધૃતં વક્ષસિ લાલિતં પ્રિયાત્ ।
આક્રાન્તમેકેન જગત્રયં પુરા
ધ્યેયં મુનીન્દ્રૈરભિમાનવર્જિતૈઃ ॥ ૫૧॥

જગતામાદિભૂતસ્ત્વં જગત્ત્વં જગદાશ્રયઃ ।
સર્વભૂતેષ્વસંયુક્ત એકો ભાતિ ભવાન્ પરઃ ॥ ૫૨॥

ઓઙ્કારવાચ્યસ્ત્વં રામ વાચામવિષયઃ પુમાન્ ।
વાચ્યવાચકભેદેન ભવાનેવ જગન્મયઃ ॥ ૫૩॥

કાર્યકારણકર્તૃત્વફલસાધનભેદતઃ ।
એકો વિભાસિ રામ ત્વં માયયા બહુરૂપયા ॥ ૫૪॥

ત્વન્માયામોહિતધિયસ્ત્વાં ન જાનન્તિ તત્ત્વતઃ ।
માનુષં ત્વાભિમન્યન્તે માયિનં પરમેશ્વરમ્ ॥ ૫૫॥

આકાશવત્ત્વં સર્વત્ર બહિરન્તર્ગતોઽમલઃ ।
અસઙ્ગો હ્યચલો નિત્યઃ શુદ્ધો બુદ્ધઃ સદવ્યયઃ ॥ ૫૬॥

યોષિન્મૂઢાહમજ્ઞા તે તત્ત્વં જાને કથં વિભો ।
તસ્માત્તે શતશો રામ નમસ્કુર્યામનન્યધીઃ ॥ ૫૭॥

દેવ મે યત્ર કુત્રાપિ સ્થિતાયા અપિ સર્વદા ।
ત્વત્પાદકમલે સક્તા ભક્તિરેવ સદાસ્તુ મે ॥ ૫૮॥

નમસ્તે પુરુષાધ્યક્ષ નમસ્તે ભક્તવત્સલ ।
નમસ્તેઽસ્તુ હૃષીકેશ નારાયણ નમોઽસ્તુતે ॥ ૫૯॥

ભવભયહરમેકં ભાનુકોટિપ્રકાશં
કરધૃતશરચાપં કાલમેઘાવભાસમ્ ।
કનકરુચિરવસ્ત્રં રત્નવત્કુણ્ડલાઢ્યં
કમલવિશદનેત્રં સાનુજં રામમીડે ॥ ૬૦॥

સ્તુત્વૈવં પુરુષં સાક્ષાદ્રાઘવં પુરતઃ સ્થિતમ્ ।
પરિક્રમ્ય પ્રણમ્યાશુ સાઽનુજ્ઞાતા યયૌ પતિમ્ ॥ ૬૧॥

અહલ્યયા કૃતં સ્તોત્રં યઃ પઠેદ્ભક્તિસંયુતઃ ।
સ મુચ્યતેઽખિલૈઃ પાપૈઃ પરં બ્રહ્માધિગચ્છતિ ॥ ૬૨॥

પુત્રાદ્યર્થે પઠેદ્ભક્ત્યા રામં હૃદિ નિધાય ચ ।
સંવત્સરેણ લભતે વન્ધ્યા અપિ સુપુત્રકમ્ ॥ ૬૩॥

સર્વાન્ કામાનવાપ્નોતિ રામચન્દ્રપ્રસાદતઃ ॥ ૬૪॥

બ્રહ્મઘ્નો ગુરુતલ્પગોઽપિ પુરુષઃ સ્તેયી સુરાપોઽપિ વા
માતૃભ્રાતૃવિહિંસકોઽપિ સતતં ભોગૈકબદ્ધાતુરઃ ।
નિત્યં સ્તોત્રમિદં જપન્ રઘુપતિં ભક્ત્યા હૃદિસ્થં સ્મરન્
ધ્યાયન્મુક્તિમુપૈતિ કિં પુનરસૌ સ્વાચારયુક્તો નરઃ ॥ ૬૫॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે બાલકાણ્ડે
અહલ્યોદ્ધરણં નામ પઞ્ચમઃ સર્ગઃ ॥ ૫॥

## ॥ ષષ્ઠઃ સર્ગઃ ॥

વિશ્વામિત્રોઽથ તં પ્રાહ રાઘવં સહલક્ષ્મણમ્ ।
ગચ્છામો વત્સ મિથિલાં જનકેનાભિપાલિતામ્ ॥ ૧॥

દૃષ્ટ્વા ક્રતુવરં પશ્ચાદયોધ્યાં ગન્તુમર્હસિ ।
ઇત્યુક્ત્વા પ્રયયૌ ગઙ્ગામુત્તર્તું સહરાઘવઃ ।
તસ્મિન્ કાલે નાવિકેન નિષિદ્ધો રઘુનન્દનઃ ॥ ૨॥

નાવિક ઉવાચ
ક્ષાલયામિ તવ પાદપઙ્કજં
નાથ દારુદૃષદોઃ કિમન્તરમ્ ।

માનુષીકરણચૂર્ણમસ્તિ તે
    પાદયોરિતિ કથા પ્રથીયસી ॥ ૩॥

પાદામ્બુજં તે વિમલં હિ કૃત્વા
    પશ્ચાત્પરં તીરમહં નયામિ ।
નો ચેત્તરી સદ્યુવતી મલેન
    સ્યાચ્ચેદ્વિભો વિદ્ધિ કુટુમ્બહાનિઃ ॥ ૪॥

ઇત્યુક્ત્વા ક્ષાલિતૌ પાદૌ પરં તીરં તતો ગતાઃ ।
કૌશિકો રઘુનાથેન સહિતો મિથિલાં યયૌ ॥ ૫॥

વિદેહસ્ય પુરં પ્રાતરૃષિવાટં સમાવિશત્ ।
પ્રાપ્તં કૌશિકમાકર્ણ્ય જનકોઽતિમુદાન્વિતઃ ॥ ૬॥

પૂજાદ્રવ્યાણિ સઙ્ગૃહ્ય સોપાધ્યાયઃ સમાયયૌ ।
દણ્ડવત્પ્રણિપત્યાથ પૂજયામાસ કૌશિકમ્ ॥ ૭॥

પપ્રચ્છ રાઘવૌ દૃષ્ટ્વા સર્વલક્ષણસંયુતૌ ।
દ્યોતયન્તૌ દિશઃ સર્વાશ્ચન્દ્રસૂર્યાવિવાપરૌ ॥ ૮॥

કસ્યૈતૌ નરશાર્દૂલૌ પુત્રૌ દેવસુતોપમૌ ।
મનઃપ્રીતિકરૌ મેઽદ્ય નરનારાયણાવિવ ॥ ૯॥

પ્રત્યુવાચ મુનિઃ પ્રીતો હર્ષયન્ જનકં તદા ।
પુત્રૌ દશરથસ્યૈતૌ ભ્રાતરૌ રામલક્ષ્મણૌ ॥ ૧૦॥

મખસંરક્ષણાર્થાય મયાનીતૌ પિતુઃ પુરાત્ ।
આગચ્છન્ રાઘવો માર્ગે તાટકાં વિશ્વઘાતિનીમ્ ॥ ૧૧॥

શરેણૈકેન હતવાન્નોદિતો મેઽતિવિક્રમઃ ।
તતો મમાશ્રમં ગત્વા મમ યજ્ઞવિહિંસકાન્ ॥ ૧૨॥

સુબાહુપ્રમુખાન્ હત્વા મારીચં સાગરેઽક્ષિપત્ ।
તતો ગઙ્ગાતટે પુણ્યે ગૌતમસ્યાશ્રમં શુભમ્ ॥ ૧૩॥

ગત્વા તત્ર શિલારૂપા ગૌતમસ્ય વધૂઃ સ્થિતા ।
પાદપઙ્કજસંસ્પર્શાત્કૃતા માનુષરૂપિણી ॥ ૧૪॥

દૃષ્ટ્વાહલ્યાં નમસ્કૃત્ય તયા સમ્યક્પ્રપૂજિતઃ ।
ઇદાનીં દ્રષ્ટુકામસ્તે ગૃહે માહેશ્વરં ધનુઃ ॥ ૧૫॥

પૂજિતં રાજભિઃ સર્વૈર્દૃષ્ટમિત્યનુશુશ્રુવે ।
અતો દર્શય રાજેન્દ્ર શૈવં ચાપમનુત્તમમ્ ।
દૃષ્ટ્વાયોધ્યાં જિગમિષુઃ પિતરં દ્રષ્ટુમિચ્છતિ ॥ ૧૬॥

ઇત્યુક્તો મુનિના રાજા પૂજાર્હાવિતિ પૂજયા ।
પૂજયામાસ ધર્મજ્ઞો વિધિદૃષ્ટેન કર્મણા ।
તતઃ સમ્પ્રેષયામાસ મન્ત્રિણં બુદ્ધિમત્તરમ્ ॥ ૧૭॥

જનક ઉવાચ
શીઘ્રમાનય વિશ્વેશચાપં રામાય દર્શય ॥ ૧૮॥

તતો ગતે મન્ત્રિવરે રાજા કૌશિકમબ્રવીત્ ।
યદિ રામો ધનુર્ધૃત્વા કોટ્યામારોપયેદ્ગુણમ્ ॥ ૧૯॥

તદા મયાત્મજા સીતા દીયતે રાઘવાય હિ ।
તથેતિ કૌશિકોઽપ્યાહ રામં સંવીક્ષ્ય સસ્મિતમ્ ॥ ૨૦॥

શીઘ્રં દર્શય ચાપાગ્ર્યં રામાયામિતતેજસે ।
એવં બ્રુવતિ મૌનીશે આગતાશ્ચાપવાહકાઃ ॥ ૨૧॥

ચાપં ગૃહીત્વા બલિનઃ પઞ્ચસાહસ્રસઙ્ખ્યકાઃ ।
ઘણ્ટાશતસમાયુક્તં મણિવજ્રાદિભૂષિતમ્ ॥ ૨૨॥

દર્શયામાસ રામાય મન્ત્રી મન્ત્રયતાં વરઃ ।
દૃષ્ટ્વા રામઃ પ્રહૃષ્ટાત્મા બદ્ધ્વા પરિકરં દૃઢમ્ ॥ ૨૩॥

ગૃહીત્વા વામહસ્તેન લીલયા તોલયન્ ધનુઃ ।
આરોપયામાસ ગુણં પશ્યત્સ્વખિલરાજસુ ॥ ૨૪॥

ઈષદાકર્ષયામાસ પાણિના દક્ષિણેન સઃ ।
બભઞ્જાખિલહૃત્સારો દિશઃ શબ્દેન પૂરયન્ ॥ ૨૫॥

દિશશ્ચ વિદિશશ્ચૈવ સ્વર્ગં મર્ત્યં રસાતલમ્ ।
તદદ્ભુતમભૂત્તત્ર દેવાનાં દિવિ પશ્યતામ્ ॥ ૨૬॥

આચ્છાદયન્તઃ કુસુમૈર્દેવાઃ સ્તુતિભિરીડિરે ।
દેવદુન્દુભયો નેદુર્નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૨૭॥

દ્વિધા ભગ્નં ધનુર્દૃષ્ટ્વા રાજાલિઙ્ગ્ય રઘૂદ્વહમ્ ।
વિસ્મયં લેભિરે સીતામાતરોઽન્તઃપુરાજિરે ॥ ૨૮॥

સીતા સ્વર્ણમયીં માલાં ગૃહીત્વા દક્ષિણે કરે ।
સ્મિતવક્ત્રા સ્વર્ણવર્ણા સર્વાભરણભૂષિતા ॥ ૨૯॥

મુક્તાહારૈઃ કર્ણપત્રૈઃ ક્વણચ્ચરણનૂપુરા ।
દુકૂલપરિસંવીતા વસ્ત્રાન્તર્વ્યઞ્જિતસ્તની ॥ ૩૦॥

રામસ્યોપરિ નિક્ષિપ્ય સ્મયમાના મુદં યયૌ ।
તતો મુમુદિરે સર્વે રાજદારાઃ સ્વલઙ્કૃતમ્ ॥ ૩૧॥

ગવાક્ષજાલરન્ધ્રેભ્યો દૃષ્ટ્વા લોકવિમોહનમ્ ।
તતોઽબ્રવીન્મુનિં રાજા સર્વશાસ્ત્રવિશારદઃ ॥ ૩૨॥

ભો કૌશિક મુનિશ્રેષ્ઠ પત્રં પ્રેષય સત્વરમ્ ।
રાજા દશરથઃ શીઘ્રમાગચ્છતુ સપુત્રકઃ ॥ ૩૩।
વિવાહાર્થં કુમારાણાં સદારઃ સહમન્ત્રિભિઃ ।
તથેતિ પ્રેષયામાસ દૂતાન્સ્ત્વરિતવિક્રમાન્ ॥ ૩૪॥

તે ગત્વા રાજશાર્દૂલં રામશ્રેયો ન્યવેદયન્ ।
શ્રુત્વા રામકૃતં રાજા હર્ષેણ મહતાપ્લુતઃ ॥ ૩૫॥

મિથિલાગમનાર્થાય ત્વરયામાસ મન્ત્રિભિઃ ।
ગચ્છન્તુ મિથિલાં સર્વે ગજાશ્વરથપત્તયઃ ॥ ૩૬॥

રથમાનય મે શીઘ્રં ગચ્છામ્યદ્યૈવ મા ચિરમ્ ।
વસિષ્ઠસ્ત્વગ્રતો યાતુ સદારઃ સહિતોઽગ્નિભિઃ ॥ ૩૭॥

રામમાતૃઃ સમાદાય મુનિર્મે ભગવાન્ ગુરુઃ ।
એવં પ્રસ્થાપ્ય સકલં રાજર્ષિર્વિપુલં રથમ્ ॥ ૩૮॥

મહત્યા સેનયા સાર્ધમારુહ્ય ત્વરિતો યયૌ ।
આગતં રાઘવં શ્રુત્વા રાજા હર્ષસમાકુલઃ ॥ ૩૯॥

પ્રત્યુજ્જગામ જનકઃ શતાનન્દપુરોધસા ।
યથોક્તપૂજયા પૂજ્યં પૂજયામાસ સત્કૃતમ્ ॥ ૪૦॥

રામસ્તુ લક્ષ્મણેનાશુ વવન્દે ચરણૌ પિતુઃ ।
તતો હૃષ્ટો દશરથો રામં વચનમબ્રવીત્ ॥ ૪૧॥

દિષ્ટ્યા પશ્યામિ તે રામ મુખં ફુલ્લામ્બુજોપમમ્ ।
મુનેરનુગ્રહાત્સર્વં સમ્પન્નં મમ શોભનમ્ ॥ ૪૨॥

ઇત્યુક્ત્વાઘ્રાય મૂર્ધાનમાલિઙ્ગ્ય ચ પુનઃ પુનઃ ।
હર્ષેણ મહતાવિષ્ટો બ્રહ્માનન્દં ગતો યથા ॥ ૪૩॥

તતો જનકરાજેન મન્દિરે સન્નિવેશિતઃ ।
શોભને સર્વભોગાઢ્યે સદારઃ સસુતઃ સુખી ॥ ૪૪॥

તતઃ શુભે દિને લગ્ને સુમુહૂર્તે રઘૂત્તમમ્ ।
આનયામાસ ધર્મજ્ઞો રામં સભ્રાતૃકં તદા ॥ ૪૫॥

રત્નસ્તમ્ભસુવિસ્તારે સુવિતાને સુતોરણે ।
મણ્ડપે સર્વશોભાઢ્યે મુક્તાપુષ્પફલાન્વિતે ॥ ૪૬॥

વેદવિદ્ભિઃ સુસમ્બાધે બ્રાહ્મણૈઃ સ્વર્ણભૂષિતૈઃ ।
સુવાસિનીભિઃ પરિતો નિષ્કકણ્ઠીભિરાવૃતે ॥ ૪૭॥

ભેરીદુન્દુભિનિર્ઘોષૈર્ગીતનૃત્યૈઃ સમાકુલે ।
દિવ્યરત્નાઞ્ચિતે સ્વર્ણપીઠે રામં ન્યવેશયત્ ॥ ૪૮॥

વસિષ્ઠં કૌશિકં ચૈવ શતાનન્દઃ પુરોહિતઃ ।
યથાક્રમં પૂજયિત્વા રામસ્યોભયપાર્શ્વયોઃ ॥ ૪૯॥

સ્થાપયિત્વા સ તત્રાગ્નિં જ્વાલયિત્વા યથાવિધિ ।
સીતામાનીય શોભાઢ્યાં નાનારત્નવિભૂષિતામ્ ॥ ૫૦॥

સભાર્યો જનકઃ પ્રાયાદ્રામં રાજીવલોચનમ્ ।
પાદૌ પ્રક્ષાલ્ય વિધિવત્તદપો મૂર્ધ્ન્યધારયત્ ॥ ૫૧॥

યા ધૃતા મૂર્ધ્નિ શર્વેણ બ્રહ્મણા મુનિભિઃ સદા ।
તતઃ સીતાં કરે ધૃત્વા સાક્ષતોદકપૂર્વકમ્ ॥ ૫૨॥

રામાય પ્રદદૌ પ્રીત્યા પાણિગ્રહવિધાનતઃ ।
સીતા કમલપત્રાક્ષી સ્વર્ણમુક્તાદિભૂષિતા ॥ ૫૩॥

દીયતે મે સુતા તુભ્યં પ્રીતો ભવ રઘૂત્તમ ।
ઇતિ પ્રીતેન મનસા સીતાં રામકરેઽર્પયન્ ॥ ૫૪॥

મુમોદ જનકો લક્ષ્મીં ક્ષીરાબ્ધિરિવ વિષ્ણવે ।
ઉર્મિલાં ચૌરસીં કન્યાં લક્ષ્મણાય દદૌ મુદા ॥ ૫૫॥

તથૈવ શ્રુતિકીર્તિં ચ માણ્ડવીં ભ્રાતૃકન્યકે ।
ભરતાય દદાવેકાં શત્રુઘ્નાયાપરાં દદૌ ॥ ૫૬॥

ચત્વારો દારસમ્પન્ના ભ્રાતરઃ શુભલક્ષણાઃ ।
વિરેજુઃ પ્રજયા સર્વે લોકપાલા ઇવાપરે ॥ ૫૭॥

તતોઽબ્રવીદ્વસિષ્ઠાય વિશ્વામિત્રાય મૈથિલઃ ।
જનકઃ સ્વસુતોદન્તં નારદેનાભિભાષિતમ્ ॥ ૫૮॥

યજ્ઞભૂમિવિશુદ્ધ્યર્થં કર્ષતો લાઙ્ગલેન મે ।
સીતામુખાત્સમુત્પન્ના કન્યકા શુભલક્ષણા ॥ ૫૯॥

તામદ્રાક્ષમહં પ્રીત્યા પુત્રિકાભાવભાવિતામ્ ।
અર્પિતા પ્રિયભાર્યાયૈ શરચ્ચન્દ્રનિભાનના ॥ ૬૦॥

એકદા નારદોઽભ્યાગાદ્વિવિક્તે મયિ સંસ્થિતે ।
રણયન્મહતીમ્ વીણાં ગાયન્નારાયણં વિભુમ્ ॥ ૬૧॥

પૂજિતઃ સુખમાસીનો મામુવાચ સુખાન્વિતઃ ।
શૃણુષ્વ વચનં ગુહ્યં તવાભ્યુદયકારણમ્ ॥ ૬૨॥

પરમાત્મા હૃષીકેશો ભક્તાનુગ્રહકામ્યયા ।
દેવકાર્યાર્થસિદ્ધ્યર્થં રાવણસ્ય વધાય ચ ॥ ૬૩॥

જાતો રામ ઇતિ ખ્યાતો માયામાનુષવેષધૃક્ ।
આસ્તે દાશરથિર્ભૂત્વા ચતુર્ધા પરમેશ્વરઃ ॥ ૬૪॥

યોગમાયાઽપિ સીતેતિ જાતા વૈ તવ વેશ્મનિ ।
અતસ્ત્વં રાઘવાયૈવ દેહિ સીતાં પ્રયત્નતઃ ॥ ૬૫॥

નાન્યેભ્યઃ પૂર્વભાર્યૈષા રામસ્ય પરમાત્મનઃ ।
ઇત્યુક્ત્વા પ્રયયૌ દેવગતિં દેવમુનિસ્તદા ॥ ૬૬॥

તદારભ્ય મયા સીતા વિષ્ણોર્લક્ષ્મીર્વિભાવ્યતે ।
કથં મયા રાઘવાય દીયતે જાનકી શુભા ॥ ૬૭॥

ઇતિ ચિન્તાસમાવિષ્ટઃ કાર્યમેકમચિન્તયમ્ ।
મત્પિતામહગેહે તુ ન્યાસભૂતમિદં ધનુઃ ॥ ૬૮॥

ઈશ્વરેણ પુરા ક્ષિપ્તં પુરદાહાદનન્તરમ્ ।
ધનુરેતત્પણં કાર્યમિતિ ચિન્ત્ય કૃતં તથા ॥ ૬૯॥

સીતાપાણિગ્રહાર્થાય સર્વેષાં માનનાશનમ્ ।

ત્વત્પ્રસાદાન્મુનિશ્રેષ્ઠ રામો રાજીવલોચનઃ ॥ ૭૦॥

આગતોऽત્ર ધનુર્દ્રષ્ટું ફલિતો મે મનોરથઃ ।
અદ્ય મે સફલં જન્મ રામ ત્વાં સહ સીતયા ॥ ૭૧॥

એકાસનસ્થં પશ્યામિ ભ્રાજમાનં રવિં યથા ॥ ૭૨॥

ત્વત્પાદામ્બુધરો બ્રહ્મા સૃષ્ટિચક્રપ્રવર્તકઃ ।
બલિસ્ત્વત્પાદસલિલં ધૃત્વાભૂદ્દિવિજાધિપઃ ॥ ૭૩॥

ત્વત્પાદપાંસુસંસ્પર્શાદહલ્યા ભર્તૃશાપતઃ ।
સદ્ય એવ વિનિર્મુક્તા કોऽન્યસ્ત્વત્તોऽધિરક્ષિતા ॥ ૭૪॥

યત્પાદપઙ્કજપરાગસુરાગયોગિ-
      વૃન્દૈર્જિતમ્ભવભયં જિતકાલચક્રૈઃ ।
યન્નામકીર્તનપરા જિતદુઃખશોકા
      દેવાસ્તમેવ શરણં સતતં પ્રપદ્યે ॥ ૭૫॥

ઇતિ સ્તુત્વા નૃપઃ પ્રાદાદ્રાઘવાય મહાત્મને ।
દીનારાણાં કોટિશતં રથાનામયુતં તદા ॥ ૭૬॥

અશ્વાનાં નિયુતં પ્રાદાદ્ગજાનાં ષટ્શતં તથા ।
પત્તીનાં લક્ષમેકં તુ દાસીનાં ત્રિશતં દદૌ ॥ ૭૭॥

દિવ્યામ્બરાણિ હારાન્શ્ચ મુક્તારત્નમયોજ્જ્વલાન્ ।
સીતાયૈ જનકઃ પ્રાદાત્પ્રીત્યા દુહિતૃવત્સલઃ ॥ ૭૮॥

વસિષ્ઠાદીન્ સુસમ્પૂજ્ય ભરતં લક્ષ્મણં તથા ।
પૂજયિત્વા યથાન્યાયં તથા દશરથં નૃપમ્ ॥ ૭૯॥

પ્રસ્થાપયામાસ નૃપો રાજાનં રઘુસત્તમમ્ ।
સીતામાલિઙ્ગ્ય રુદતીં માતરઃ સાશ્રુલોચનાઃ ॥ ૮૦॥

શ્વશ્રૂશુશ્રૂષણપરા નિત્યં રામમનુવ્રતા ।
પાતિવ્રત્યમુપાલમ્બ્ય તિષ્ઠ વત્સે યથા સુખમ્ ॥ ૮૧॥

પ્રયાણકાલે રઘુનન્દનસ્ય ભેરીમૃદઙ્ગાનકતૂર્યઘોષઃ ।
સ્વર્વાસિભેરીઘનતૂર્યશબ્દૈઃ સંમૂર્ચ્છિતો ભૂતભયઙ્કરોऽભૂત્ ॥ ૮૨॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
   બાલકાણ્ડે ષષ્ઠઃ સર્ગઃ ॥ ૬॥

## ॥ સપ્તમઃ સર્ગઃ ॥

અથ ગચ્છતિ શ્રીરામે મૈથિલાદ્યોજનત્રયમ્ ।
નિમિત્તાન્યતિઘોરાણિ દદર્શ નૃપસત્તમઃ ॥ ૧॥

નત્વા વસિષ્ઠં પપ્રચ્છ કિમિદં મુનિપુઙ્ગવ ।
નિમિત્તાનીહ દૃશ્યન્તે વિષમાણિ સમન્તતઃ ॥ ૨॥

વસિષ્ઠસ્તમથ પ્રાહ ભયમાગામિ સૂચ્યતે ।
પુનરપ્યભયં તેઽદ્ય શીઘ્રમેવ ભવિષ્યતિ ॥ ૩॥

મૃગાઃ પ્રદક્ષિણં યાન્તિ પશ્ય ત્વાં શુભસૂચકાઃ ।
ઇત્યેવં વદતસ્તસ્ય વવૌ ઘોરતરોઽનિલઃ ॥ ૪॥

મુષ્ણંશ્ચક્ષૂંષિ સર્વેષાં પાંસુવૃષ્ટિભિરર્દયન્ ।
તતો વ્રજન્ દદર્શાગ્રે તેજોરાશિમુપસ્થિતમ્ ॥ ૫॥

કોટિસૂર્યપ્રતીકાશં વિદ્યુત્પુઞ્જસમપ્રભમ્ ।
તેજોરાશિં દદર્શાથ જામદગ્ન્યં પ્રતાપવાન્ ॥ ૬॥

નીલમેઘનિભં પ્રાંશું જટામણ્ડલમણ્ડિતમ્ ।
ધનુઃ પરશુપાણિં ચ સાક્ષાત્કાલમિવાન્તકમ્ ॥ ૭॥

કાર્તવીર્યાન્તકં રામં દૃપ્તક્ષત્રિયમર્દનમ્ ।
પ્રાપ્તં દશરથસ્યાગ્રે કાલમૃત્યુમિવાપરમ્ ॥ ૮॥

તં દૃષ્ટ્વા ભયસન્ત્રસ્તો રાજા દશરથસ્તદા ।
અર્ઘ્યાદિપૂજાં વિસ્મૃત્ય ત્રાહિ ત્રાહીતિ ચાબ્રવીત્ ॥ ૯॥

દણ્ડવત્પ્રણિપત્યાહ પુત્રપ્રાણં પ્રયચ્છ મે ।
ઇતિ બ્રુવન્તં રાજાનમનાદૃત્ય રઘૂત્તમમ્ ॥ ૧૦॥

ઉવાચ નિષ્ઠુરં વાક્યં ક્રોધાત્પ્રચલિતેન્દ્રિયઃ ।
ત્વં રામ ઇતિ નામ્ના મે ચરસિ ક્ષત્રિયાધમ ॥ ૧૧॥

દ્વન્દ્વયુદ્ધં પ્રયચ્છાશુ યદિ ત્વં ક્ષત્રિયોઽસિ વૈ ।
પુરાણં જર્જરં ચાપં ભઙ્ક્ત્વા ત્વં કત્થસે મુધા ॥ ૧૨॥

અસ્મિન્સ્તુ વૈષ્ણવે ચાપે આરોપયસિ ચેદ્ગુણમ્ ।
તદા યુદ્ધં ત્વયા સાર્ધં કરોમિ રઘુવંશજ ॥ ૧૩॥

નો ચેત્સર્વાન્ હનિષ્યામિ ક્ષત્રિયાન્તકરો હ્યહમ્ ।
ઇતિ બ્રુવતિ વૈ તસ્મિન્શ્ચચાલ વસુધા ભૃશમ્ ॥ ૧૪॥

અન્ધકારો બભૂવાથ સર્વેષામપિ ચક્ષુષામ્ ।
રામો દાશરથિર્વીરો વીક્ષ્ય તં ભાર્ગવં રુષા ॥ ૧૫॥

ધનુરાચ્છિદ્ય તદ્ધસ્તાદારોપ્ય ગુણમઞ્જસા ।
તૂણીરાદ્બાણમાદાય સન્ધાયાકૃષ્ય વીર્યવાન્ ॥ ૧૬॥

ઉવાચ ભાર્ગવં રામં શ઼ૃણુ બ્રહ્મન્ વચો મમ ।
લક્ષ્યં દર્શય બાણસ્ય હ્યમોઘો મમ સાયકઃ ॥ ૧૭॥

લોકાન્ પાદયુગં વાપિ વદ શીઘ્રં મમાજ્ઞયા ।
અયં લોકઃ પરો વાથ ત્વયા ગન્તું ન શક્યતે ॥ ૧૮॥

એવં ત્વં હિ પ્રકર્તવ્યં વદ શીઘ્રં મમાજ્ઞયા ।
એવં વદતિ શ્રીરામે ભાર્ગવો વિકૃતાનનઃ ॥ ૧૯॥

સંસ્મરન્ પૂર્વવૃત્તાન્તમિદં વચનમબ્રવીત્ ।
રામ રામ મહાબાહો જાને ત્વાં પરમેશ્વરમ્ ॥ ૨૦॥

પુરાણપુરુષં વિષ્ણું જગત્સર્ગલયોદ્ભવમ્ ।
બાલ્યેઽહં તપસા વિષ્ણુમારાધયિતુમઞ્જસા ॥ ૨૧॥

ચક્રતીર્થં શુભં ગત્વા તપસા વિષ્ણુમન્વહમ્ ।
અતોષયં મહાત્માનં નારાયણમનન્યધીઃ ॥ ૨૨॥

તતઃ પ્રસન્નો દેવેશઃ શઙ્ખચક્રગદાધરઃ ।
ઉવાચ માં રઘુશ્રેષ્ઠ પ્રસન્નમુખપઙ્કજઃ ॥ ૨૩॥

શ્રીભગવાનુવાચ

ઉત્તિષ્ઠ તપસો બ્રહ્મન્ ફલિતં તે તપો મહત્ ।
મચ્ચિદંશેન યુક્તસ્ત્વં જહિ હૈહયપુઙ્ગવમ્ ॥ ૨૪॥

કાર્તવીર્યં પિતૃહણં યદર્થં તપસઃ શ્રમઃ ।
તતસ્ત્રિઃસપ્તકૃત્વસ્ત્વં હત્વા ક્ષત્રિયમણ્ડલમ્ ॥ ૨૫॥

કૃત્સ્નાં ભૂમિં કશ્યપાય દત્ત્વા શાન્તિમુપાવહ ।
ત્રેતામુખે દાશરથિર્ભૂત્વા રામોઽહમવ્યયઃ ॥ ૨૬॥

ઉત્પત્સ્યે પરયા શક્ત્યા તદા દ્રક્ષ્યસિ માં તતઃ ।
મત્તેજઃ પુનરાદાસ્યે ત્વયિ દત્તં મયા પુરા ॥ ૨૭॥

તદા તપશ્ચરન્લ્લોકે તિષ્ઠ ત્વં બ્રહ્મણો દિનમ્ ।
ઇત્યુક્ત્વાન્તર્દધે દેવસ્તથા સર્વં કૃતં મયા ॥ ૨૮॥

સ એવ વિષ્ણુસ્ત્વં રામ જાતોઽસિ બ્રહ્મણાર્થિતઃ ।
મયિ સ્થિતં તુ ત્વત્તેજસ્ત્વયૈવ પુનરાહૃતમ્ ॥ ૨૯॥

અદ્ય મે સફલં જન્મ પ્રતીતોઽસિ મમ પ્રભો ।
બ્રહ્માદિભિરલભ્યસ્ત્વં પ્રકૃતેઃ પારગો મતઃ ॥ ૩૦॥

ત્વયિ જન્માદિષડ્ભાવા ન સન્ત્યજ્ઞાનસમ્ભવાઃ ।
નિર્વિકારોઽસિ પૂર્ણસ્ત્વં ગમનાદિવિવર્જિતઃ ॥ ૩૧॥

યથા જલે ફેનજાલં ધૂમો વહ્નૌ તથા ત્વયિ ।
ત્વદાધારા ત્વદ્વિષયા માયા કાર્યં સૃજત્યહો ॥ ૩૨॥

યાવન્માયાવૃતા લોકાસ્તાવત્ત્વાં ન વિજાનતે ।
અવિચારિતસિદ્ધૈષાઽવિદ્યા વિદ્યાવિરોધિની ॥ ૩૩॥

અવિદ્યાકૃતદેહાદિસઙ્ઘાતે પ્રતિબિમ્બિતા ।
ચિચ્છક્તિર્જીવલોકેઽસ્મિન્ જીવ ઇત્યભિધીયતે ॥ ૩૪॥

યાવદ્દેહમનઃપ્રાણબુદ્ધ્યાદિષ્વભિમાનવાન્ ।
તાવત્કર્તૃત્વભોક્તૃત્વસુખદુઃખાદિભાગ્ભવેત્ ॥ ૩૫॥

આત્મનઃસંસૃતિર્નાસ્તિ બુદ્ધેર્જ્ઞાનં ન જાત્વિતિ ।
અવિવેકાદ્દ્વયં યુઙ્ક્ત્વા સંસારીતિ પ્રવર્તતે ॥ ૩૬॥

જડસ્ય ચિત્સમાયોગાચ્ચિત્ત્વં ભૂયાચ્ચિતેસ્તથા ।
જડસઙ્ગાજ્જડત્વં હિ જલાગ્ન્યોર્મેલનં યથા ॥ ૩૭॥

યાવત્ત્વત્પાદભક્તાનાં સઙ્ગસૌખ્યં ન વિન્દતિ ।
તાવત્સંસારદુઃખૌઘાન્ન નિવર્તેન્નરઃ સદા ॥ ૩૮॥

તત્સઙ્ગલબ્ધયા ભક્ત્યા યદા ત્વાં સમુપાસતે ।
તદા માયા શનૈર્યાતિ તાનવં પ્રતિપદ્યતે ॥ ૩૯॥

તતસ્ત્વજ્જ્ઞાનસમ્પન્નઃ સદ્ગુરુસ્તેન લભ્યતે ।
વાક્યજ્ઞાનં ગુરોર્લબ્ધ્વા ત્વત્પ્રસાદાદ્વિમુચ્યતે ॥ ૪૦॥

તસ્માત્ત્વદ્ભક્તિહીનાનાં કલ્પકોટિશતૈરપિ ।
ન મુક્તિશઙ્કા વિજ્ઞાનશઙ્કા નૈવ સુખં તથા ॥ ૪૧॥

અતસ્ત્વત્પાદયુગલે ભક્તિર્મે જન્મજન્મનિ ।
સ્યાત્ત્વદ્ભક્તિમતાં સઙ્ગોઽવિદ્યા યાભ્યાં વિનશ્યતિ ॥ ૪૨॥

લોકે ત્વદ્ભક્તિનિરતાસ્ત્વદ્ધર્મામૃતવર્ષિણઃ ।
પુનન્તિ લોકમખિલં કિં પુનઃ સ્વકુલોદ્ભવાન્ ॥ ૪૩॥

નમોઽસ્તુ જગતાં નાથ નમસ્તે ભક્તિભાવન ।
નમઃ કારુણિકાનન્ત રામચન્દ્ર નમોઽસ્તુ તે ॥ ૪૪॥

દેવ યદ્યત્કૃતં પુણ્યં મયા લોકજિગીષયા ।
તત્સર્વં તવ બાણાય ભૂયાદ્રામ નમોઽસ્તુ તે ॥ ૪૫॥

તતઃ પ્રસન્નો ભગવાન્ શ્રીરામઃ કરુણામયઃ ।
પ્રસન્નોઽસ્મિ તવ બ્રહ્મન્ યત્તે મનસિ વર્તતે ॥ ૪૬॥

દાસ્યે તદખિલં કામં મા કુરુષ્વાત્ર સંશયમ્ ।
તતઃ પ્રીતેન મનસા ભાર્ગવો રામમબ્રવીત્ ॥ ૪૭॥

યદિ મેઽનુગ્રહો રામ તવાસ્તિ મધુસૂદન ।
ત્વદ્ભક્તસઙ્ગસ્ત્વત્પાદે દૃઢા ભક્તિઃ સદાસ્તુ મે ॥ ૪૮॥

સ્તોત્રમેતત્પઠેદ્યસ્તુ ભક્તિહીનોઽપિ સર્વદા ।
ત્વદ્ભક્તિસ્તસ્ય વિજ્ઞાનં ભૂયાદન્તે સ્મૃતિસ્તવ ॥ ૪૯॥

તથેતિ રાઘવેણોક્તઃ પરિક્રમ્ય પ્રણમ્ય તમ્ ।
પૂજિતસ્તદનુજ્ઞાતો મહેન્દ્રાચલમન્વગાત્ ॥ ૫૦॥

રાજા દશરથો હૃષ્ટો રામં મૃતમિવાગતમ્ ।
આલિઙ્ગ્યાલિઙ્ગ્ય હર્ષેણ નેત્રાભ્યાં જલમુત્સૃજત્ ॥ ૫૧॥

તતઃ પ્રીતેન મનસા સ્વસ્થચિત્તઃ પુરં યયૌ ।
રામલક્ષ્મણશત્રુઘ્નભરતા દેવસંમિતાઃ ॥ ૫૨॥

સ્વાં સ્વાં ભાર્યામુપાદાય રેમિરે સ્વસ્વમન્દિરે ।

માતાપિતૃભ્યાં સંહૃષ્ટો રામઃ સીતાસમન્વિતઃ ।
રેમે વૈકુણ્ઠભવને શ્રિયા સહ યથા હરિઃ ॥ ૫૩॥

યુધાજિન્નામ કૈકેયીભ્રાતા ભરતમાતુલઃ ।
ભરતં નેતુમાગચ્છત્સ્વરાજ્યં પ્રીતિસંયુતઃ ॥ ૫૪॥

પ્રેષયામાસ ભરતં રાજા સ્નેહસમન્વિતઃ ।
શત્રુઘ્નં ચાપિ સમ્પૂજ્ય યુધાજિતમરિન્દમઃ ॥ ૫૫॥

કૌસલ્યા શુશુભે દેવી રામેણ સહ સીતયા ।
દેવમાતેવ પૌલોમ્યા શચ્યા શક્રેણ શોભના ॥ ૫૬॥

સાકેતે લોકનાથપ્રથિતગુણગણો લોકસઙ્ગીતકીર્તિઃ
 શ્રીરામઃ સીતયાસ્તેઽખિલજનનિકરાનન્દસન્દોહમૂર્તિઃ ।
નિત્યશ્રીર્નિર્વિકારો નિરવધિવિભવો નિત્યમાયાનિરાસો
 માયાકાર્યાનુસારી મનુજ ઇવ સદા ભાતિ દેવોઽખિલેશઃ ॥ ૫૭॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
 બાલકાણ્ડે સપ્તમઃ સર્ગઃ ॥ ૭॥

સમાપ્તોઽયં બાલકાણ્ડઃ

Encoded and proofread by Nagaraj Balijepalli nagaraj at iastate.edu
Proofread by Sunder Hattangadi
Revised by Agne Easwaran easwaranpsa at rediffmail.com and
ahimsasoldier at gmail.com

*adhyAtmarAmAyaNe bAlakANDamh*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*